मुखे त्रिष्टुप्छन्दसे हृदि श्रीमहालक्ष्मीदेवतायै नमः इति विन्यस्य यों तों मों तभये नमः हृदयाय नमः यों तों
मों तभये स्वाहा शिरसे स्वाहा यों तों मों तभये वषट् शिखायै वषट् यों तों हुं कवचाय हुं श्रियै नेत्राय वौषट् श्री
नमः अस्त्राय फडिति षडंगं करहृदयादौ विन्यस्य शेषं ध्यानादि पूर्ववत्कुर्यात् अथ चतुर्दशाक्षरः पद्मप्रभे
पद्मसुंदरि पद्मबैं स्वाहा इति मूलेन प्राणायामत्रयं कृत्वा पद्मप्रभे हृदयाय पद्मसुंदरि शिरः पद्मबैं शिखा
(या स्वाहा कवचं समस्तमंत्रेणास्त्राय फडिति पंचांगं विन्यस्य पूर्वोक्तैकादशवत् सर्वं कुर्यात् अथ त्रिशक्तिल
त्मीमंत्रः सप्तत्वसमाप्तित्रिश्रदामंत्रपवन्नेयः अथ साम्राज्यलक्ष्मीमंत्रः श्रीं सकलह्रीं श्रीं इति षडक्षरमंत्रे
प्राणायामत्रयं कृत्वा शिरसि हरये ऋषये नमः मुखे गायत्रीछन्दसे नमः हृदि श्रीसाम्राज्यलक्ष्मीदेवतायै
नमः गुह्ये सकलह्रीं बीजाय नमः पादयोः श्रीं शक्तये नमः इति विन्यस्य विनियोगमुक्त्वा सकलह्रां हृद
याय नमः सकलह्रीं शिरः सकलह्रूं शिखायै सकलह्रैं कवचा सकलह्रौं नेत्राय वौषट् सकलह्रः अस्त्रा २२

पद्मप्रभे पद्मसुंदरि पद्मबैं स्वाहा

श्रीं सकल ह्रीं श्रीं

यफडिति षडंगं करहृदयादौ विन्यस्य ध्यायेत् अतसीपुष्पसंकाशं रत्नभूषणभूषितं शंखचक्रगदापद्म
शार्ङ्गबाणधरांकैः षड्भिः परां भ्रांदेवे शिवकरदाभयशोभितं वामाग्रूर्ध्वयोरायेन दायधः स्थयोरस्येन दाय
स्थयोरपरेन दायधस्थयोरिति रेइति ध्यात्वा जपं पानेत्र्यष्यादिविन्यस्य समर्पयेणामेत् अथ समार्पोलक्ष्मीमं
त्रः नमो ब्रह्मननये अनेन प्राणायामत्रयं कृत्वा नमः ध्यन् ब्रह्मननये शिरः नमः शिखायै ब्रह्मननयेकव
चे नमो नेत्रे ब्रह्मननयेस्त्रमिति विन्यस्य ध्यानादि पूर्ववैकेकातरलक्ष्मीमंत्रवत्कुर्यात् इति लक्ष्मीमंत्रः अथा
न्नपूर्णामंत्राः ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा इति विंशत्यर्णो मंत्रेण प्राणायामत्रयं कृ
त्वा शिरसि ब्रह्मणे ऋषये नमः मुखे त्रिष्टुप्छंदसे हृदि श्री अन्नपूर्णायै नमः गुह्ये ह्रीं बीजाय पादयोः श्रीं श
क्तये नाभौ क्लीं कीलकाय इति विन्यस्य समानसमस्तृद्धये जपे विनियोग इति कृताञ्जलिः कृत्वा ह्रां हृदयाय
नमः ह्रीं हुं मित्यादिषडंगं विधाय ध्यायेत् यथा तप्तकांचनसंकाशं बालेन्दुकृतशेखरी नवरत्नप्रभादीप्तमु
कुटां कुंकुमारुणां चित्रवस्त्रपरिधानां शफरांतीं त्रिलोचनां सुवर्णकलशाकारपीनोन्नतघनस्तनीं तुन्दल
मीशमनिशं हृष्टानंदमयीं परां मानंदमुखलोलाक्षीं मेखलाढ्यनितंबिनीं अन्नदाननिरतां नित्यं भूमिश्रीभ्यां न

मं॰
वं॰
२२

मस्कृतो अत्रदानरत्नामित्यनेनवामहस्तेपात्रंदक्षिणेदेवीं ध्यानवतीमिति नैयम् ध्यात्वाजपं तेकरन्यासं विधाय
जपं देव्यै समर्प्य प्रणमेत् इत्यन्नपूर्णामंत्रः वयंविद्याप्रणवादिवत्बीजरहिताशोडशार्णा मायाद्यानाराद्याथ
वामस्मातरीआत्तरी मायातारादिकावाष्टादशार्णाभवति न्यासादिपूर्ववत् ह्रां ह्रीमित्यादिषडंगं एवमस्याप्र
वविद्यायाश्चत्वारो भेदाभवंति अथान्नपूर्णायाअन्नप्रदाख्यमंत्रस्य विधिः अत्रमहान्नभैरवाधिपतयेममाभिप्र
दापयस्वाहा इतिद्वाविंशत्यक्षरमूलेन ऋषिः ब्राह्मणानायमम शिरसिब्रह्मणोऋषयेनमः मुखे अतिकृतिश्छंदसेन
मः हृदिभूश्रीभ्यांदेवतायैनमः इतिविन्यस्य ममधनधान्यसमृद्धये विनियोगः इतिकृतांजलिःकृत्वा मूलमंत्रा
भिरष्टधाः पादयोरंगुष्ठयोरन्नमह्रीं हृदयायनमः तर्जन्योरन्नंमेदेहि शिरसेस्वाहा मध्यमयोरन्नाधिपत
येशिखायैवषट् अनामिकयोर्ममान्नंप्रदापयकवचायहुं कनिष्ठिकयोःस्वाहा अस्त्रायफट् इतिनेत्रवर्जंह
दयादिष्वपिविन्यस्यध्यायेत् यथाक्षीराब्धौरत्नतोयवप्रकनकद्वीपमराद्धिमस्तुभेकल्पद्रुवनशोभितेमणिम
येसिंहासनस्थायिनः आसीनेवसयात्रियोयनसमृद्धानुसंसकजंत्रोमुहुर्भक्तायप्रविवितयेहिनमुवेधान्यान्न
संपन्नये इतिध्यात्वायथाशक्तिजपंतेन्न्यासादिकंविन्यस्यसमर्प्यप्रणमेत् इत्यन्नपूर्णायाअन्नप्रदाख्योमंत्रः २१

इति श्रीगोस्वामिनगनिवासात्मजगोस्वामिजनार्दनकृतौ मंत्रचंद्रिकायां तृतीयः प्रकाशः अथाश्वारूढामंत्रः
ॐ प्लिं परमेश्वरि स्वाहा इति दशाक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे विराजे छंदसे
नमः हृदये अश्वारूढायै देवतायै नमः इति विन्यस्य वशार्थे विनियोग इति कृतांजलिः कृत्वा ॐ प्लिं हृदया
य नमः ॐ परमेश्वरि शिरसे स्वाहा ॐ स्वाहा शिखायै वषट् ॐ प्लिं कव ॐ परमेश्वरि ने ॐ स्वाहा अस्त्राय फट्
इति करषडंगं विधाय ध्यानं कुर्यात् यथा अश्वारूढा नवशाकिंशुकाभा भालनेत्रा वदा स्मापाशाबद्धा मदनविव
शां साध्यमाश्वानयंती दक्षेणाघत्कनकरचितां वेत्रयष्टिं दधाना वध्वा भांमनसेकलयेपीनवक्षोजनम्रा
इति ध्यात्वा जपांते ऋष्यादिविन्यस्य समर्घ्यप्रणमेत् अयं दशाक्षरो मंत्रः प्रणवादिरथवा भुवनेश्वर्यादिर्भवति
तदैकादशाक्षरो भवति क्रां क्रीं मित्यादिना षडंगविधिः ऋषिध्यानादिकं पूर्ववत् इति अश्वारूढामंत्रः अथ गौ
रीमंत्रः ह्रीं गौरि रुद्रदयिते योगेश्वरि हुं फट् स्वाहा इति षोडशाक्षरमंत्रमंत्रेणाद्रिः प्राणानायाम शिरसि ब्रह्मन ऋष
ये मुखे त्रिष्टुप् छंदसे नमः हृदि श्रीगौर्यै देवतायै नमः इति न्यस्य मम मनोऽभीष्टसिद्धये विनियोग इति कृतांजलि
कृत्वा क्रां क्रीं इत्याद्यादि षडंगं विधाय ध्यायेत् हेमाभां विभ्रतीं दोर्भ्यां दर्पणं जननसाधने पाशांकुशौ समं वभूषांतां

मं॰ वं॰ २४ 24

गौरीं सर्वदा स्मरेत् वामाद्यूर्ध्वयोराद्येनदाद्यूर्ध्वयस्थयोरन्ये इति ध्यात्वा जपांते करषडंगं विधाय जपं समर्प्य प्रणमेत्
अथ पद्मामंत्रः ह्रीं पद्मावती स्वाहा इति सप्ताक्षरेण त्रिःप्राणायामः शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्रीछंद
से नमः हृदये श्रीपद्मावतीदेवतायै नमः गुह्ये श्रीं बीजाय नमः पादयोः स्वाहा शक्तये नमः इति विन्यस्य ह्रां ह्रीं
मित्यादिषडंगविधिः ध्यानं रक्तामलकरद्वंद्वामब्जस्थां कमलासनां वेदप्रकाश्योपविनयपतानानाकल्पोज्ज्वलां स्म
रेत् इति ध्यात्वा सर्वं कुर्यात् अथ जेष्ठालक्ष्मीमंत्रः ऐं ह्रीं श्रीं आद्यलक्ष्मिस्वयंभुवे ह्रीं जेष्ठायै नमः इति सप्तद
शाक्षरेण त्रिःप्राणायामः शिरसि सिद्धब्रह्मणे ऋषये मुखे त्रिष्टुप्छंदसे नमः हृदि जेष्ठालक्ष्म्यै देवतायै गुह्ये
श्रीं बीजाय पादयोः ह्रीं शक्तये इति विन्यस्य मूलविद्याक्षरैः पंचभिः ऐं ह्रीं श्रीं हृदयाय नमः आद्यलक्ष्मि शि
रसे स्वाहा स्वयंभुवे शिखायै ह्रीं कवचाय हुं जेष्ठायै नेत्राय नमः अस्त्राय फट् इति षडंगं विधाय ध्यायेत् पद्मा
सनस्थामरुणामरुणांबरधारिणीं कुंकुमतोदलिप्तांगीं शोभकलकमलेक्षणां मंदस्मितमुखीं नेत्रं कलशं वस
पात्रकं दधानामूर्ध्वबाहुभ्यां पाशमप्यंकुशं तथा इति ध्यात्वा वामाद्यूर्ध्वयोराद्यंतरापधःस्थयोरन्य इति ध्यात्वा
कलशमयाद्यं ततो जपांते ऋष्यादिदिकं विन्यस्य समर्प्य प्रणमेत् इति जेष्ठालक्ष्मीमंत्रः अथ त्रिपुटामंत्रः श्री २४

ह्रीं क्लीं इति अन्तरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि संमोहन भृगवे ऋषये नमः मुखे गायत्री छंदसे नमः हृ
दये श्रीत्रिपुरादेवतायै नमः इति विन्यस्य श्रीं ह्रीं क्लीं इति हृदि शिरो वर्मके वलैः षडंगं विधाय ध्यायेत् यथा हेमाभो
पारिजातद्रुमरुचिरवने मंडपे स्वर्णभूमौ रत्नोद्यत्कुट्टिमे पीठलसदरुणसरोजारूसिंहासनेन्द्रे षट्कोणस्थां स्मरेदं
कुमलयुगगुणानंकुशं चापबाणौ विभ्राणां गौरदेहामणिमयमकुटां चारुभूषाचितांगां हृतीभिश्चामरादर्शस
मुद्गकरंडकान् तांबूलं चैव दंतीभिरावृतां परितः शुभां इति ध्यात्वावाहनपाद्यार्घ्यादिकं विन्यस्य जपं समर्प्य
प्रणमेत् इति त्रिपुरामंत्रः ॥

25

२५

अथशिवदूतीमंत्रः ह्रींशिवदूत्यैनमः इतिसप्तार्णेवमंत्रेणप्राणायामत्रयंकृत्वाशिरसिरुद्रायऋषयेनमः मुखेगा
यत्रीछंदसेनमः हृदिश्रीशिवदूतीनित्यायैदेवतायै गुह्येह्रींबीजायनमः पादयोर्नमः शक्तयेनमः नाभौशिवदू
त्यैकीलकायनमः इतिविन्यस्यविनियोगमुक्त्वा ह्रांह्रीमित्यादिनाषडंगंविधायध्यायेत् निराकालमप्याकृदिवाक
रसमप्रभां नवरत्नकिरीटांचत्रीक्षणामरुणांबरां नानालंकरणसंभिन्नदेहकांतिविराजितां शुचिस्मितामष्टभुजांस्तू
यमानांमहर्षिभिः पाशांखेटंगदांरत्नचषकंवामबाहुभिः दक्षिणैरंकुशंखड्गंकुठारंकमलंतथा दधानांसाधकाभी
ष्टदानोद्यमसमन्वितां इतिध्यात्वाजपांतेऋष्यादिकंविन्यस्यजपंसमर्पणमेत् इतिशिवदूतीनित्यामंत्रः अथ
त्वरितानित्यामंत्रः ॐह्रींहुंखेचछेक्षःस्त्रींहुंक्षेंह्रींफट् इतिद्वादशाक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसि अर्जुनायऋ
षयेनमः मुखेविराजेछंदसेनमः हृदयेश्रीत्वरितानित्यायैदेवतायै गुह्येहुंबीजायपादयोः ह्रींशक्तये इतिवि
न्यस्यकृतांजलिर्विनियोगमुक्त्वा खेचछेहृदः क्षःशिरः स्त्रींशिखास्त्रींहुंकवचायहुं क्षेंनेत्राय ह्रींफट् अ
स्त्रायफट् इतिषडंगंविधायध्यानं लसच्छ्यामतनुंरक्तपंकजायपदांबुजां ताटंकांगदविद्योतिरसनानूपुरान्वितैः
विप्रक्षत्रियविट्शूद्रजातिभिर्भीमविग्रहैः द्विद्विक्रमादष्टनागैः कल्पितोद्यद्विभूषणां शेषस्थवासुकिर्विश्रोतक्ष।

मं: वं: २९

26

कर्कोटकोऽनन्तपो वेशेषाय्यमहापद्मोऽनन्तयौ कुलिकशंखयोन्तयौं स्रष्टौ शंखपः शंखपालः पत्ववांतकसंवीतांशि
खिपिञ्छकृतैः शुभैः चलैर्पिर्भूषितभुजंगमाणिक्यमुकुटोज्वलां वर्हिवर्हकृतापीडांतच्छ्रांतनयनाकिनीं गुंजाफ
लनमहारविलसत्कुचमंडलां त्रिनेत्रांचारुवदनांमंदस्मितमुखांबुजां वराभयकरांगरुडद्वयीमुकुटशोभितां तनुम
ध्यलतामुघटस्थूलस्तनयुक्तांगमे अरुणायतसन्नेत्रांसशोणाधरपल्लवां विलासमंदिरां देवीं नरुणीं संस्मरेत्सुधीः
इतिध्यात्वा जपांतेकरषडंगंकृत्वासमर्प्यप्रणमेत् इतित्वरितानित्यामंत्रः अथत्रिकंठकीमंत्रः हूंखेतउतिख्यहर
मंत्रेण प्राणायामत्रयंकृत्वा शिरसिअर्जुनायऋषये मुखेविराट्छंदसे हृदि श्रीत्रिकंठकीदेवतायै इतिवि
न्यस्यहिरण्यामंत्रहवैः षडंगंविधाय ध्यायेत् यथा नाभेर्नालरुचामयोरुणरुचिंकंदात्समाभाननांचंद्रालंविभ
रानैर्नैर्युगमितैर्दंष्ट्रोत्कटैभीषणां दीपद्वंद्वदृशादिहस्वकमलांवेष्टात्तसद्धेखरां मुग्धपाललिलोचनांभयहरां दे
वीसदाभावयेत् युगमितैश्चतुर्भिः दरः शंखः चरिश्चक्रं वामाधूर्ध्वयोः शंखचक्रे अन्ययोरन्यत् इतिध्यात्वाय
थाशक्तिजपांतेअर्घ्यादिविन्यस्यजपंसमर्पयेत् इतित्रिकंटकीमंत्रः अथवशगत्रिकंटकीमंत्रः खेस्त्रीं हेउतिम
तरंमंत्रेण प्राणायामत्रयंकृत्वा हिरण्यकमंत्राणैः षडंगंकृत्वाध्यानादिसर्वंपूर्ववत्कुर्यात् अथवैसख्यामंत्रः अंके

वटतपयेषं इत्यष्टात्तरमंत्रेणाञ्चिःप्राणानायम्य शिरसिनारदायऋषये: मुखेत्रुष्टु: हृदयेश्रीवैसखैदेवता: २
तिविनियोगमूत्का ॐअकचहृदयायनम: ॐकचटशिरसे ॐचटतशिखा ॐटतपकव ॐतपनेत्र ॐपयश
अस्त्रायफडितिषडंगंविधाय ध्यानं शोणपद्मप्रतीकाशंमुक्तमूर्द्धजलविनीवलत्कांचनसंभूत[illegible]कुंडलोज्वलशा
लिनीस्वर्णरत्नसमुद्भद्रकिरीटसूत्रधारिणी शरच्चंद्रकलारूणेनेत्रैस्त्रिभिश्चारुविभूषितां बंधूकदंतवसनाशिरी
षप्रभनासिकांकंबुग्रीवांविशालाक्षींसूर्यकोटिसमप्रभां वत्तर्भुजांविवसनोन्नतपयोधरां दक्षिणाइंगणनिर्मि
श्रीपैरणासिद्धसूत्रकांसिद्धसूत्रजपमालाविभ्रतींवामहस्ताभ्यांमभीतिवरदायिनीं ध्यानमुखनागानासौदश[illegible]गुल्फा
स्वयालिंकां गोत्रिणरत्नस्तंभवमध्यगालंवासेस्थितां किमप्रसीतिवचनंव्याहरंतीमहुर्मुहु: पंचाननेश्वर:संस्थिति
शीलंतीस्ववाहने इतिध्यात्वायथाशक्तिजपान्तेरक्षादिविन्यजपेसर्पप्रणामेत् इतिवैसख्यामंत्र: ॐमहामायायैन
म: ॐवैसखैनम: इतिवैसख्याअष्टात्तरपंचवंतरमंत्रयो: ऋषिध्यानादिपूर्ववद्वोध्यं अथबगलामुखीमंत्र: ॐबग
लामुखीसर्वदुष्टानांवाचंमुखंपदंस्तंभयजिह्वांकीलयबुद्धिंविनाशयह्लींॐस्वाहा इतिषट्त्रिंशदक्षरमंत्रेणप्राणा
यामत्रयंकृत्वा शिरसिनारायणाऋषयेनम: मुखेत्रिष्टुप्छंदसेनम: हृदयेश्रीबगलामुख्यैदेवतायैनम: गुह्ये

मं
चं
२७
27

ह्लींबीजाय नमः पादयोः स्वाहाशक्तये नमः इति विन्यस्य कृतांजलिर्विनियोगमुक्त्वा ओं ह्लीं हृदयाय नमः बगलामुखि
शिरसे स्वाहा सर्वदुष्टानां शिखायै वषट् वाचं मुखं पदं स्तंभय कवचाय हुं जिह्वां कीलय नेत्राय वौः बुद्धिं विनाशय अ
स्त्राय फट् इति करहृदयादौ षडंगविन्यस्य ध्यायेत् गंभीरां च मदोन्मत्तां तप्तकांचनसंनिभां चतुर्भुजां त्रिनयनां क
मलासनसंस्थितां मुद्गरं दक्षिणे पाशं वामे जिह्वां च वज्रकं पीतांबरधरां सांद्रवृत्तपीनपयोधरां हेमकुंडलभूषां
च पीतचंद्रार्द्धशेखरां पीतभूषणभूषां च स्वर्णसिंहासनस्थितां दक्षिणाधरोत्तरयोर्मुद्गरपाशौ वामाधरोत्तरयोर्जि
ह्वावज्रौ जिह्वा साधकविपक्षजनस्य इति ध्यात्वा यथाशक्ति जपं तेनाप्यादिविन्यस्य जपं देव्यै समर्प्य प्रणमेत्
इति बगलामुखीमंत्रः अथ छिन्नमस्तामंत्रः श्रीं ह्लीं हूं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा इति षोडशाक्षरमंत्रेण प्रा
णायामत्रयं कृत्वा ओं वज्रवैरोचनीये हूं हूं फट् स्वाहा इति त्रयोदशाक्षरमंत्रेण वा प्राणायामत्रयं कृत्वा शिरसि भैरवऋष
ये नमः मुखे सम्राट् छंदसे हृदये छिन्नमस्तकायै देवतायै नमः इति विन्यस्य ओं आं खड्गाय हृदयाय नमः इत्यंगु
ष्ठाभ्यां कनिष्ठिकयोर्न्यसेत् ओं ईं सुखड्गाय शिरसे स्वाहा इति तर्जनीभ्यामनामिकयोर्न्यसेत् ओं ऊं वज्राय शिखायै
वषट् इति मध्यमाभ्यां मध्यमयोरेव न्यसेत् ओं ऐं पाशाय कवचाय हुं इत्यनामिकाभ्यां तर्जन्योर्न्यसेत् ओं औं अंकु

ऋॠऌॡएऐओऔअंअः अस्त्रयफट्यहूंहूं अस्त्रायफट् इति कनिष्टिकाभ्यां संपुटयोर्न्यसेदेवं हृदयादि पंचांगेषु नेत्र
रहितेषु न्यसेत् अथ ध्यानं तत्र सकलं निष्कलं कलातीतमिति त्रिविधं सकलं यथा स्वनाभौ नीरजं ध्यायेत्क्षुद्रं विकसि
तं सितं तत्पद्मकोशमध्ये तु मंडलं चंडरोचिषः जपाकुसुमसंकाशं रक्तबंधूकसन्निभं रजः सत्वतमोरेखायोनिमंडलसु
ज्वलं तस्य मध्ये तु तां देवीं सूर्यकोटिसमप्रभां खड्गछिन्नकरे वामे धारयंतीं स्वमस्तकं प्रसारितमुखीं भीमां लेलिहाना
ग्रजिह्विकां पिबंतीं रौधिरीं धारां निजकंठसमुद्भवां विकीर्णकेशपाशां च नानापुष्पसमन्वितां दक्षिणे च करे कर्त्रीं मुंडमा
लाविभूषितां दिगंबरां महाघोरां प्रत्यालीढपदस्थितां अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीं षोडशवर्षदेशी
यां पीनोत्तुंगकुचद्वयां रतिकामोपरिस्थितां केचिद्ध्यायंति मंत्रिणः विपरीतरतस्थौ तु ध्यायेद्रतिमनोभवौ वर्णिनीं
डाकिनीं चैव वामदक्षिणपार्श्वयोः दक्षिणे वर्णिनीं ध्यायेत् वामपार्श्वे च डाकिनीं वर्णिनीं लोहितां सौम्यां मुक्तकेशीं
दिगंबरां कपालकर्त्रिकाहस्तां वामदक्षिणयोगतः देवीकंठोच्छलद्रक्तधारापानं प्रकुर्वतीं अस्थिमालाधरां
देवीं नागयज्ञोपवीतिनीं डाकिनीं वामपार्श्वे च कल्पांतज्वलनोपमां विद्युज्जटां त्रिनयनां दंतपंक्तिबलाकिनीं
दंष्ट्राकरालवदनां पीनोत्तुंगकुचद्वयां महादेवीं मुक्तकेशीं महाघोरां दिगंबरां लेलिहानमहाजिह्वां मुंडमाला

विभूषितां कपालकर्त्रिकाहस्तां वामदक्षिणयोगतः देवीं गलोच्छलद्रक्तधारापानं प्रकुर्वतीं करस्थरक्तकपालेन भीष
णेनातिभीषणां भ्राम्यन्तीं निषेवमाणां तां ध्यायेद्देवीं विचक्षणः प्रत्यालीढपदस्थितां रतिकामयोर्निर्भरयंत्रणाभिप्रा
येण संकुचितचरणाभ्यां स्थितामित्यर्थः अथ निष्कलध्याने स्वनाभौ नीरजं शुभ्रं भानुमंडलमध्यस्थितं योनिचक्रसा
माशुक्लारुणाञ्चितशुभ्रशुभ्रे तन्मध्ये महादेवीं चिंतयेत्तत्स्वरूपिणीं प्रदीपकलिकाकारामद्वितीयरूपां स्थितां क
रकच्छपिकाशुक्लां बद्धपद्मासनस्थितां योनिमुद्रासमाशुक्लां हृदयस्थितलोचनां पीनवक्षोजयुगलां ध्यानं वा।
निष्कलं स्मरेत् एतन्नृतस्यास्तां ध्यानं ध्येयं अथ परतिध्येयं कलावतीध्यानं यथा अंतरे स्वशरीरस्य नाभिनीरजसंग
तां निर्लेपां निर्गुणां सौम्यां बालचंद्रप्रभामिव समाधिमात्रगम्यां चतुर्णामलप्रवेष्टितां कलातीतां गुणातीतां मुक्ति
मार्गप्रदायिनीं एवं ध्यात्वा यथाशक्तिजपं तेन ऋष्यादिविन्यासमर्पणमेत् इति छिन्नमस्तामंत्रः इति स्वामिज
नार्दनभट्टकृतायां मंत्रचंद्रिकायां चतुर्थप्रकाशः अथोग्रतारामंत्रः ह्रीं त्रीं हूं फट् ॐ इति पंचाक्षरमंत्रेण प्राणायामत्र
यं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीउग्रतारायै देवतायै गुह्ये हूं बीजाय नमः
इति विन्यस्य ह्रां ह्रीं इत्यादिना षडंगं विधाय ध्यायेत् प्रत्यालीढपदार्पितांघ्रिशवहृद्घोराट्टहासां परां खड्गेन्दीव

रकारांगिरवर्वरभुजाहूंकारबीजोद्भवा खर्वानीलविशालपिंगलजटाजूटोग्रनागैर्युता जाड्यंन्यस्यकपालकेत्रि
जगतांहंत्युग्रतारास्वयं प्रत्यालीढपदाशवहृदयनिर्भरयंज्ञाणिभिप्रायेणसंकुचितचरणाउर्द्धादिदत्तकर यो
रायेनदादिवामयोरन्येत्यापुष्पंध्यात्वा जपांतेऽर्घ्यादिकंविन्यस्यजपंदेव्यैसमर्प्यप्रणमेत् इत्युग्रतारामंत्रः
अथदक्षिणकालीमंत्रः क्रींक्रींक्रींहूंहूंह्रींह्रींदक्षिणकालिकेक्रींक्रींक्रींहूंहूंह्रींह्रींस्वाहा इतिद्वाविंशत्यक्ष
रेणमंत्रेणैषि: प्राणानायाम्य शिरसिभैरवायऋषयेनमः मुखेविराट्छंदसेनमः हृदयेश्रीदक्षिणकालिकायै
देवतायैनमः गुह्येहूंबीजायनमः पादयोः ह्रींशक्तयेनमः इतिविन्यस्यममाभीष्टसिद्ध्यर्थेविनियोगाइति
कृतांजलिर्भूत्वा क्रांक्रीमित्यादिषड्दीर्घभाजाषडंगंविधायध्यायेत् करालवदनांघोरांमुक्तकेशींचतुर्भुजां
कालिकांदक्षिणांदिव्यांमुंडमालाविभूषणां सद्यःछिन्नशिरःखड्गवामोर्द्ध्वकराबुजां अभयंवरदंचैवदक्षि।
णाधोर्द्ध्वपाणिकां महामेघप्रभांश्यामांतथैवचदिगंबरां कंठावसक्तमुंडालीगलद्रुधिरचर्चितां कर्णावतंसता
नीतशवयुग्मविराजितां घोरदंष्ट्राकरालास्यांपीनोन्नतपयोधरां शवानांकरसंघातैः कृतकांचीहसन्मुखीं
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननां घोररूपांमहारौद्रींश्मशानालयवासिनीं दंतुरांदक्षिणव्यापिमुक्तल

मं· वं· २९

२९

वकवोवयाशवद्रूपमहादेवापदयोपरिसंस्थितांशिवाभिर्वारद्रूपाभिश्चतुर्दिक्षु समन्वितां महाकालसमाप्रकांश्चा
वोरस्मिरतान्वितां सावप्रसन्नवदनां स्मेराननसरोरुहां एवं संचिन्तयेत्कालीं स्मशानालयवासिनीं इति ध्यात्वा जपा
न्ते ऋष्यादिविन्यस्य जपं देव्यै समर्प्य देवतामुत्तरूपां प्रणमेत् इति दक्षिणाकालीमंत्रः अथ धूमावतीमंत्रः धूं धूं धूमा
वती स्वाहा इत्यष्टाक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि पिप्पलादऋषये नमः मुखे निवृच्छन्दसे नमः हृ
दि श्रीधूमावत्यै देवतायै इति विन्यस्य धां धीमित्याद्युपदीर्घभाजा षडंगं करहृदयादौ विन्यस्य ध्यायेत् यथा वि
वर्णां चंचलाकृष्णादीर्घा च मलिनांबरा विमुक्तकुंतला रूक्षा विधवा विरलद्विजा काकध्वजरथारूढा विलंबितपयो
धरा सूर्पहस्तातिरूक्षा लीधृतहस्ता वरान्विता प्रवृद्धघोणा तु भृशं कुटिला कुटिलेक्षणा क्षुत्पिपासार्दिता नित्यं
भयदा कलहास्पदा इति ध्यात्वा यथाशक्ति जपान्ते ऋष्यादिकं विन्यस्य जपं देव्यै समर्प्य प्रणमेत् इति धूमावतीमंत्रः
अथ भद्रकालीमंत्रः ह्रौं कालि महाकालि किलि किलि फट् स्वाहा इति चतुर्दशाक्षरमंत्रेण प्राणायामत्रयं कृत्वा।
ऋष्यादिकमस्य नास्ति ह्रौं हृदि कालि शिरसि महाकालि शिखा किलि किलि कवचाय हुं फट् नेत्रत्रयाय वौषट् स्वाहा
अस्त्राय फट् इति षडंगं करहृदयादौ विन्यस्य ध्यानं कुर्यात् यथा तत्ताम्रकोटराक्षीमषिमलिनमुखी मुक्तकेशी रु

दंतीनादं त्वमावदंती जगदखिलमिदं ग्रासमेकं करोमि हस्ताभ्यं धारयंती ज्वलदनलशिखासंनिभं पाशमुग्रं दंतै
र्जंबूफलाभैः परिहरतु भयं भद्रकाली इति ध्यात्वा जपं विधाय करषडंगन्यासं कृत्वा जपं समर्प्य प्रणमेत् इ
ति भद्रकालीमंत्रः अथ महाकालीमंत्रः ॐ शें शें क्रें क्रें पशून् गृहाण हूं फट् स्वाहा इति चतुर्दशाक्षरमंत्रेण प्राणा
यामत्रयं कृत्वा न्यासं षडंगीन ऋष्यादिनात्र किंचिद्विचारणा ध्यानं यथा पंचवक्त्रां महारौद्रीं प्रतिवक्त्रं त्रिलोच
नां शक्तिशूलधनुर्बाणखेटखड्गवराभयान् दधानां दशभुजैर्देवीं विप्राणां भोगिभूषणां इति ध्यात्वा जपं समर्प्य
प्रणमेत् अथ उच्छिष्टचांडालिनीमंत्रः सप्तचीतिद्वितीयं नाम ॐ उच्छिष्टचांडालिनी सुमुखि देवि महापिशाचिनि ह्रीं
ठः ठः ठः इति विंशत्यक्षरमंत्रेण प्राणायामत्रयं कृत्वा ध्यायेत् ऋष्यादि नास्ति यथा शवोपरि समासीनां रक्तांब
रपरिच्छदां रक्तालंकारसंयुक्तां गुंजाहारविराजितां रक्तां घोरशवर्षा वपीनोन्नतघनस्तनीं कपालकर्तृकाह
स्तां पुगमक्ष्यानिरूपिणीं वामदक्षिणयोगेन ध्यायेत्मंत्रविदुत्तमः उच्छिष्टेन बलिं दद्यात् जपेत् तन्मानसः उच्छिष्टे
नैव कर्तव्यो जपो यस्याः सिद्धिमिच्छता उच्छिष्टजपमालस्यमायंते सर्वसिद्धयः ततो जपं समर्प्य प्रणमेत् अथ
सिद्धवक्त्रामंत्रः ॐ यं महाकृत्याङ्ग्रीमहायोगिनि गौरि भयंकरी हूं इति षोडशाक्षरमंत्रेण प्राणायामत्रयं कृत्वा शि

मं॰
चं॰
३॰
30

इत्यस्य गिरिशेश्वरऋषये नमः मुखे गायत्रीछंदसे नमः हृदये महाकृत्यायै देवतायै नमः इति विन्यस्य विनियोगमुक्त्वा
ह्रां ह्रां महायोगिनि गोविरिद्व फट् हृदयाय नमः ह्रीं ह्रीं भुवनभयंकरि ह्रूं फट् शिरसे॰ ह्रूं ह्रूं महायोगिनि गोवि
फट् शिखा॰ ह्रैं ह्रैं भुवनभयंकरी ह्रूं फट् कवचा॰ ह्रौं ह्रौं महायोगिनि गोविरि फट् नेत्राय ह्रः ह्रीं भुवनभयंकरी।
फट् अस्त्राय फट् इति षडंगकरादौ विधाय ध्यायेत् यथा सिंहासनोत्कसमन्वीलंवमानपयोधरां दंष्ट्राक
रालवदनां त्रिनेत्रां सर्वतोज्वलां कृसकंचुकसंवीतां विभ्रमाग्निसमप्रभां त्रिशूलचक्रवषकारवखट्वांगकरपंकजा
लेलिहानमहाजिह्वां विद्युत्केतनभीषणां इति ध्यात्वा जपं विधाय ऋष्यादिविन्यस्य समर्प्य प्रणमेत् इति म
हाकृत्यामंत्रः अथ धनदायक्षिणीमंत्रः रं श्रीं श्रीं रतिप्रिये स्वाहा इति नवाक्षरमंत्रेण त्रिः प्राणानायम्य ध्याये
त् नाम्न्यासकल्पना यथा हेमप्राकारमध्ये सुरविटपितटे हेमपीठाधिरूढां यक्षीं बालां विसर्पत्यमलवद
नोल्लासिघम्मिल्लभारां पीनोत्तुंगस्तनाढ्यां कुवलयनयनां रक्तवर्णां कराभ्यां भ्राम्यद्रक्तोत्पलाश्मानवरविवसना
रत्नभूषांगणां इति ध्यात्वा यथाशक्ति जपं विधाय गुह्यातिगुह्येति समर्प्य प्रणमेत् इति गोस्वामिजनार्दन
कृतायां मंत्रचंद्रिकायां पंचमप्रकाशः॥ समाप्तिं शाक्तिप्रकरणं अथ वैष्णवमंत्राः ॐ नमो नारायणाय इत्य

अथ शीतलामन्त्रः ॐ ह्रीं श्रीं शीतलायै नमः इति नवाक्षरमन्त्रेण प्राणायामत्रयं कृत्वा उपमन्युऋषये नमः शिरसि बृहती छन्दसे नमो मुखे श्रीशीतलायै देवतायै नमो हृदि
इति ह्रां श्रां हृदयाय नमः ह्रीं श्रीं शिरसे स्वाहा ह्रूं श्रूं शिखायै वषट् ह्रैं श्रैं कवचाय हुम् ह्रौं श्रौं नेत्राय वौषट् ह्रः श्रः अस्त्राय फट् इति मन्त्रैः करषडङ्गन्यासं विधाय ध्यायेत् दिगंबरां कराभ्यां
च शूर्पं मार्जनिकां तथा। दधानां रासभस्थां च नीलजीमूतसन्निभाम् रक्तांगरागवसनां रक्तमाल्यविभूषिताम् एवं ध्यायेच्छीतलां च रोगनाशाय सर्वदा इति ध्यात्वा जपं समर्प्य प्रणमेत् अस्य
मन्त्रस्यायुतं जपः दशांशमितः पायसेन होमः अस्य प्रयोगस्तु नाभिमात्रे [illegible] जपेन्नानुमृतेन स्फोटभयाः शीघ्रं विनश्यन्त्यतिदारुणाः इति

५
८

ष्टाक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिसाध्यनारायणाय ऋषये · मुखेदैवीगायत्र्यै छंदसे · हृदयेश्रीपरमात्मनेदेव
तायै · इतिविन्यस्य विनियोगमुक्त्वा क्रुद्धोल्कायस्वाहा हृद् · महोल्कायस्वाहा शिर · वीरोल्कायस्वाहा शिखा ·
द्युल्कायस्वाहा कव · सहस्रोल्कायस्वाहा अस्त्रायफट् इतिपंचांगंकृत्वानिहांतं हृदयादौन्यासंविधाय ध्यानं
यथा हस्तैश्चक्रदरौगदामरसिजेबिभ्राणमकौशसत्कांतिंश्रीधरणीविभूषितलसन्माल्यंकिरीटान्वितं श्री
वत्सांकसत्कौस्तुभोरुपदकंकेयूरहारोज्वलंराजत्कुंडलमंदिरंतंहृदिभजेपीतांबरंशार्ङ्गिणं वामाग्रेधः कर
योरायेतदायुधंहृद्योरस्थे इतिध्यात्वाजपांते अर्घ्यादिविन्यस्यगुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं सि
द्धिर्भवतुमेदेवत्वत्प्रसादात्वयिस्थितेतिजपंसमर्प्यप्रणमेत् इत्यष्टाक्षरोनारायणमंत्रः अथवासुदेवमंत्रः ॐन
मोभगवतेवासुदेवाय इतिद्वादशाक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिप्रजापतऋषयेनमः मुखेगायत्री
छंदसेनमः हृदयेश्रीवासुदेवायदेवतायैनमः इतिविन्यस्यममसर्वाभिष्टसिद्धयेविनियोगः इतिकृतांजलि
सन्कः मूलेनकरयोर्व्यापकंकृत्वा ॐहृदयायनमः नमःशिरसेस्वाहा भगवतेशिखायैवषट् वासुदेवाय
कवचायहुं ॐनमोभगवतेवासुदेवायास्त्रायफट् इतिपंचांगमंत्रानंगुष्ठादिकनिष्ठांतंकरयोर्विन्यस्य नेत्रवर्जं

हृदयादिष्वस्तांतंचविन्यस्यध्यानंकुर्यात् यथा मध्येदुग्धांबुधेर्द्वीपेरत्नयोषानिचिते तत्रसंविंत्यविपिन
मखिलर्तुनिषेविते तन्मध्येकल्पवृक्षंतंचरत्नमद्भुतदर्शनं तस्याधः स्फाटिकंरम्यंमेकमलंविमलप्रभं शारत्
गौरिंदुविलसत्प्रभापटलराजितं तत्रसंचिंतयेद्देवंवासुदेवंस्मिताननं कुंदेंद्वाभंगदाचक्रपद्मशंखविलसत्करं
चतुर्भुजनलसत्कांत्याभासयंतंजगत्त्रयं केयूरांगदसंराजद्दोर्दंडंरत्नभूषणं श्रीवत्सांकंलसद्रत्नमुकुटंकौ
स्तुभांकितं अरविंददलाताम्रसुरम्यायतलोचनं कुंडलद्योतिमत्कूटमंडलंपीतवाससं ग्रैवेयहारसंशोभिकं
बुकंठसमकंकणं विशालवक्षसंराजन्मफुल्लवनमालकं सनकादिमुनींद्रैश्चस्तूयमानंनिर्णयकांतया नि
षेवितंदिव्यदिविजातगंधर्वसंवृतैः सिद्धविद्याधरैर्यक्षैःसेवितंचमहोरगैः वामोत्संगेटितल्पःकरांतमाश्रुय
ध्यानं इतिध्यात्वायथाशक्तिजपंविधायजपांतेस्वस्थहृत्कंविन्यस्यजपंदेवायसमर्प्यप्रणमेत् इतिवासुदेवमंत्रः
अथलक्ष्मीवासुदेवमंत्रः ॐश्रींह्रींश्रींश्रींलक्ष्मीवासुदेवायनमः इतिचतुर्दशाक्षरमंत्रेणप्राणायामत्रयंकृत्वा
शिरसिप्रजापतयेऋषयेनमः मुखेगायत्रीछंदसेनमः हृदिश्रीलक्ष्मीवासुदेवायदेवतायैनमः इतिविन्य
स्यममसर्वाभीष्टसिद्धयेविनियोगःइतिकृतांजलिरुक्त्वा ॐह्रींह्रींहृदयायनमः ॐश्रींश्रींशिरसेस्वाहाः ॐला

क्ष्मीशिखायै वषट् ॐ वासुदेवाय कवचाय हुं ॐ नमः अस्त्राय फट् इति पंचांगमंत्रान् मूलाभिमन्त्ररूपाः पाण्योरंगु
लिषु विन्यस्य नेत्रहृदि ते भुजद्वयशिखुव विन्यस्य ध्यायेत् यथा उद्यत्सौदामिनीरुक्शशधररुचिरं भूषणैर्भूषि
तांगमेकीभूतं वपुः श्रीकमलनयनयोः सम्यगाश्लेषलोभात् लक्ष्मीदिश्यात्सदा वो लिखितमरजने दर्पणं रत्नचक्रं
भंभं विभ्रद्ध्रसापद्मैः सरसिरुहगदाशंखचक्राह्वयानि वामभागस्थैः करैर्द्वंद्वादिभिर्लिखितादीनि दक्षिणस्थैः
सरसीरुहादीनि चत्वारि धेयानि इति ध्यात्वा जपांते ऋष्यादीन् विन्यस्य जपं देवाय समर्पणं प्रणमेत् इति ल
क्ष्मीवासुदेवमंत्रविधिः अथ हरिहरात्मको मंत्रः ॐ ह्रीं ह्रौं शंकरनारायणाय नमः ह्रौं ह्रीं ॐ इति षोडशाक्ष
रमंत्रेण प्राणायामत्रयं कृत्वा शिरसि नारायणाय ऋषये नमः मुखे अनुष्टुप् छंदसे नमः हृदि श्रीहरिहरा
य देवतायै नमः इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृतांजलिः कृत्वा ह्रौं ह्रीमित्यादिनाकर
षडंगन्यासं विधाय ध्यानं कुर्यात् यथा शूलं चक्रं पांचजन्यमभीतिं दधतं करैः स्वच्छरूपार्द्धनीलार्द्धदेहं हरिह
रं भजे हरेशाद्यादितदयोंतमाद्यपध्याने इति ध्यात्वा यथाशक्ति जपं विधाय जपांते ऋष्यादीन् विन्यस्य जपं देवा
य समर्पणं प्रणमेत् इति हरिहरमंत्रः अथ दधिवामनमंत्रः ॐ नमो विश्वेश्वराय पतये महाबलाय स्वाहा इम

मं॰
व॰
२२

32

ह्रादशाक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिवसिद्धदेवेऋषयेनमः मुखेविराजेछंदसेनमः ८ हृदयेश्रीदधिवाम
नायदेवतायैनमः इतिविन्यस्यममसर्वाभीष्टसिद्धयेजपेविनियोगः इतिकृतांजलिःकृत्वा ॐ हृदयायनमः
नमः शिरसेस्वाहा विश्वेशिखायैवषट् सर्गापतयेकवचायहुं महाबलायनेत्रायवौषट्स्वाहा अस्त्रायफडिति
षडंगमंत्राणामंगुष्ठादिकरतलांतंकरयोर्विन्यस्य हृदयादिषडंगेष्वपिविन्यस्यध्यानंकुर्यात् यथा शंकेंदाभः सि
तांभोरुहस्थमणिक्लृप्तयोनिविष्टः श्रीभूम्याश्लिष्टपार्श्वःस्फटिकमणिनिभोशेषभूषाविशेषः वामेद
ध्यन्नपूर्णंकनकजचषकंस्वर्णपीयूषकुंभंबिभ्रत्श्रीवामनाख्यःसततमवतवोविश्वरिष्टार्थदायी इतिध्या
त्वायथाशक्तिजपंविधायजपांतेऋष्यादिकंविन्यस्य जपंदेवायसमर्प्यप्रणमेत् इतिदधिवामनमंत्रः यथ
यज्ञेश्वर॰॰ मन्त्रमंत्रः ॐ क्रौं श्रीं वं शौं नमोविश्वेश्वरापतयेमहाबलायस्वाहा इतिह्याविंशत्यक्षरमंत्रेणप्राणा
यामत्रयंकृत्वाशिरसिच्यवनायऋषयेनमः मुखेगायत्रीछंदसेनमः हृदयेश्रीयज्ञेश्वरवामनायदेवतायैन
मः इतिविन्यस्यक्रांक्रीमित्यादिनाकरषडंगन्यासंकृत्वाध्यायेत् यथा कश्चिरथवलेदेवनिविष्टंस्मरसीरु
हेमप्रभंभंमनेत्रंचवाहस्मितमनोहरं दंडवामरतकुंभवशरवंदंसमप्रभं दधिभक्तसोपदंशावमपात्रंचबिभ्रतं

चिंतयेज्जगतामाद्यं जगदार्तिहरं हरिं इति ध्यात्वा यथाशक्ति जपं विधाय जपांते ऋष्यादिकं विन्यस्य जपं सम
र्पयेच्छरणमेत् इति पंचेत्स्वरवामनमंत्रः अथ भोगवामनमंत्रः ॐ नमो भगवते विश्वेश्वरापतये महाबलाय
स्वाहा इति द्वाविंशत्यक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि कपिलाय ऋषये नमः मुखे गायत्रीछंदसे न
मः हृदये भोगवामनाय देवतायै नमः इति विन्यस्याभीष्टसिद्धये विनियोगः इति कृतांजलिः कृत्वा ॐ नमः
हृदयं भगवते शिरः विश्वेशिखा सुरापतकवचं महाबलायनेत्रं स्वाहा अस्त्रमिति षडंगमंत्रानंगुष्ठादिकर
तलांतेकरयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य कर्पूरधवलमित्यादिवाक्येन स्वरवामनवद्ध्यात्वा जपं कृत्वा
जपांते ऋष्यादीन् विन्यस्य जपं समर्पयेत् इति भोगवामनमंत्रः अथ मायावालकवामनमंत्रः ॐ नमो मा
यावालक विश्वेश्वरापतये महाबलाय स्वाहा इति त्रयोविंशत्यक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्र
ह्मणे ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीमायावालकवामनदेवतायै नमः इति विन्यस्याभी
ष्टसिद्धये विनियोग इति कृतांजलिः कृत्वा ॐ नमो हृत् मायावालका शिरः विश्वेशिखा सुरापतये कव
चं महाबलायनेत्रं स्वाहा अस्त्रमिति षडंगमंत्रानंगुष्ठादिकरतलांतेकरयोर्विन्यस्य हृदयादिषडंगेष्वपि वि।

मं॰
व॰
३३

त्विसश्यानंकुर्यात् यथा पीतांबरोत्तरीयोसौ मौंजीकौपीनभृद्यतिः कमंडलुवटध्यानं दंडं छत्रं करे स्थितं य
ज्ञोपवीती नीलाभो ध्यानपरवक्रमवामनः इति ध्यात्वा जपेनेत ऋष्यादीन् विन्यस्य जपं समर्प्य प्रणमेत् इति मा
यावालकमंत्रः अथ हयग्रीवमंत्रः स्वं इत्येकाक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः
मुखे गायत्रीछंदसे नमः हृदये श्रीहयग्रीवाय देवतायै नमः इति विन्यस्याभीष्टसिद्धये विनियोगः इति कृ
तांजलिरुत्काप्यंत हां शिरः हूं शिखा हैं कवचं हौं नेत्रं हः अस्त्राय फट् इति षडंगमंत्रानंगुष्ठादि
करतलांतं करयोर्विन्यस्य हृदयादि षडपि विन्यस्य ध्यायेत् यथा धवलनलिननिष्ठं तीरकराग्रे नंपवा
लयसरोजे पुस्तकाभीतिदाने दधतममलवस्त्राकल्पनालाभिरामं तुरगवदनविष्णोः मिदे वारितिस्वे
दतोंश्रादितयोंतमाद्यप्याने इति ध्यात्वा यथाशक्तिजपं विधाय जपेनेत ऋष्यादिकं विन्यस्य जपं देवाय
समर्प्य प्रणमेत् केचित् स्वमेवंमंत्रं वदंति अन्ये तु स्त्रमेवंमंत्रं वदंति अत्र यथागुरूपदेशं जपादिकं विधेयं
इति हयग्रीवमंत्रः अथ द्वितीयो हयग्रीवमंत्रः ॐ उद्गिरत्प्रणवोद्गीथसर्ववागीश्वरेश्वर सर्ववेदमयाचिं
त्यसर्वं बोधय बोधय स्वाहा इति षट्त्रिंशदक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः

मुखेऽनुष्टुप्छंदसे नमः । हृदि श्रीहयग्रीवदेवतायै नमः । इति विन्यस्य ॐ उद्गीथाय नमः । उद्गिरत्प्रणवोद्गीथशि
रसे स्वाहा सर्ववागीश्वरेश्वरशिखायै वषट् सर्ववेदमयाचिंत्यकवचाय हुं सर्वं बोधय बोधय स्वाहा स्त्रू अस्त्राय
फडिति पंचांगमंत्रान्मूलमंत्राभिमंत्रकरांगुलीषु विन्यस्य नेत्रं वर्जं हृदयादिषु च विन्यस्य ध्यानं कुर्यात् यथा ह
यग्रीवं वचनतलवोर्हं शारदाभ्रायरभं शंखारिपाणिमश्वास्यं जानुन्यस्तकरं भजे वामदक्षोर्ध्वयोः शंखचक्रे इति
ध्यात्वा यथाशक्ति जपं विधाय जपांते ऋष्यादिकं विन्यस्य जपं समर्प्य प्रणमेत् इति द्वितीयो हयग्रीवमंत्रः
अथ तृतीयो हयग्रीवमंत्रः ॐ नमः ऋग्यजुःसामरूपाय वेदाहरणकर्मणे प्रणवोद्गीथवपुषे महाश्वशिरसे
नमः सोऽहम् इति षट्त्रिंशदक्षरमंत्रेण प्राणायामत्रयं कृत्वा ऋषिध्यानादिकं पूर्वोक्तषट्त्रिंशदक्षरमंत्रवत् कृ
त्वा समापयेत् इति तृतीयो हयग्रीवमंत्रः अथ चतुर्थो हयग्रीवमंत्रः ॐ नमः विश्वोत्तीर्णस्वरूपाय चिन्मया
नंदरूपिणे तुभ्यं नमो हयग्रीवविद्याराजाय विष्णवे स्वाहा सोऽहम् इत्यष्टत्रिंशदक्षरमंत्रेण प्राणायामत्रयं कृत्वा ऋ
ष्यादिकं पूर्वोक्तषट्त्रिंशदक्षरमंत्रवत् कुर्यात् इति चतुर्थो हयग्रीवमंत्रः अथ पंचमो हयग्रीवमंत्रः ॐ हय
शिरसे नमः इत्यष्टाक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखेऽनुष्टुप्छंदसे नमः हृ

से॰ व॰ १४

34

हृदयेश्रीवराहायदेवतायैनमः इतिविन्यस्यममसर्वाभीष्टसिद्धयेजपेविनियोगः इतिकृतांजलिंकृत्वाएकदं
ष्ट्रायहृदयायनमः ओंमहाकायशिरसेस्वाहा तेजोधिपतयेशिखायैवषट् विश्वरूपायकवचायहुं महादंष्ट्रा
यास्त्रायफडितिपंचांगमंत्रान्मूलमंत्राभिष्टयोः पाणिपादेषुहृदादिकानिसंसारावविन्यस्यनेत्ररहितपंचांगेष्वव
विन्यस्यध्यायेत् यथा जान्वोःपदावभिसुवर्णाभिभंवनाभेराजानुचंद्रधवलंवगलाद्धृतं वह्निप्रभंशशिनि
भंशिरसोगलान्तं मौलिस्थलाद्वियदमंदनिभंवकान्तं संविभ्रतंवरतलैररिशंखखङ्गान् खेटगदानदन्तशक्ति
वराभयानि सर्वसत्त्वायरणशोभितदेहमाद्यंदेवंवराहमनिशंप्रभजेस्ववित्ते दत्ताष्टपुंड्यायाग्येनदाघष्ठस्य
योरन्येतदायस्ययोरपरे तदायस्ययोर्वितरे इत्यष्टुधध्यानं ध्यानान्तरंयथा धराधरशरीरंवानीलजीमूतस
न्निभं उदयदोर्यरिपंध्यायेत्सितदंष्ट्राग्रतावलं हेमाभंपार्थिवेध्यायेन्मंडलेहिमसन्निभं वारुणेमंडलेवह्निः
कृशानुभमध्यानिले कृसंविषयभभंस्यादेवंध्यायेच्चमूकरं दंष्ट्राग्रांचसमंध्यायेत्सशैलवनकाननां वा
गीशांक्रूरकंध्यायेत्सर्वतंत्वभिस्तिततथा वाहोर्वामात्ययोश्चंद्रसूर्यौचदरगात्मकन् ब्राह्मणंपादयोर्ध्यायेत्
हृदयेचहरिंतथा शंकरंचमुखेध्यायेदितिवाध्यात्वा यथाशक्तिनयविधाय जपान्तेतुष्यादिकंविन्यस्यजं

पंसमर्प्यप्रणमेत् इति वाराहमंत्रः अथ द्वितीयो वराहमंत्रः हुं इत्येकाक्षरमंत्रेण प्राणायामं विधाय शिरसि
हयग्रीवाय ऋषये नमः मुखे अनुष्टुप्छंदसे नमः हृदये श्रीवराहाय देवतायै नमः इति विन्यस्य ह्रां ह्रीं ह्रूं
इत्यादिना करषडंगन्यासं विधाय ज्ञात्वोः पदावधीति पूर्ववध्यात्वाः न्यस्तवैसमापयेत् इति द्वितीय वराह
मंत्रः अथ तृतीयो वराहमंत्रः भूः इत्येकाक्षरमंत्रेण प्राणायामत्रयं कृत्वा ऋषिषडंगध्यानादिकं द्वितीयमंत्र
वत् कृत्वा समापयेत् इति तृतीयो वराहमंत्रः अथ चतुर्थो वराहमंत्रः ॐ भूर्वराहाय नमः इत्यष्टाक्षरमंत्रे
ण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे जगत्यै छंदसे नमः हृदये श्रीवराहाय देवतायै न
मः इति विन्यस्य ॐ हृदयाय नमः भूः शिरसे स्वाहा वराहाय शिखायै वषट् नमः कवचाय हूं ॐ भूर्वराहाय
नमः अस्त्राय फडिति पंचांगमंत्रान्मूलमंत्राभिमृष्टयोः करयोः कनिष्ठांतास्वंगुलीषु विन्यस्यैतेनैवांगैर्हृदया
दिष्वपि विन्यस्य ध्यायेत् यथा कृष्णांगत्वविनीलवक्त्रनलिनं पद्मस्थितं स्वांकगः लोलाक्षीशक्तिमहारवाहूभि
र्यापाशं खगदामंबुजं वक्त्रं बिभ्रतमप्रमेयकांतिमतिशं देवं वराहं भजे भूलक्ष्मीरतिकांतिभिः परिवृतं चर्मासि
मरीचिभिः वामोर्ध्वकरमारभ्य दक्षोर्ध्वपर्यंतमायुधध्यानं इति निध्यात्वा जपांते ऋष्यादिकं विन्यस्य जपं स

मं॰
वं॰
३५
35

मर्पयेत् इतिवनर्योवराहमंत्रः अथधराहृदयाभिधोमंत्रः ॐनमोभगवत्यैधरित्र्यैधरणिधरायैस्वाहा इत्ये
कोनविंशत्यक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिवराहायऋषयेनमः मुखेनिवृच्छंदसेनमः हृदयेश्रीधरा
ण्यैदेवतायैनमः इतिविन्यस्याभीष्टसिद्धयेविनियोगइतिकृतांजलिःकृत्वा ॐनमःहृदयायनमः भगवत्यैशि
रसेस्वाहा धरित्र्यैशिखायैवषट् धरणिधरेकवचायहुं धरायैनेत्रायवौषट् स्वाहाअस्त्रायफट् इतिषडंगमंत्रा
न्अंगुष्ठादिकरतलांतंकरयोर्विन्यस्य हृदयादिषडंगेष्वपिविन्यस्यध्यायेत् यथा इंदीवरश्यामांगीशालिमंजरीदधा
तीशुके धरापद्मासनाध्येयाश्यामातन्वीसुभूषिता वामोर्ध्वोदितदर्पोनमाम्युपध्यानं इतिध्यात्वायथाशक्ति
जपंविधायतज्जपंतेजःसृष्ट्यादीन्विन्यस्यजपंसमर्पयेत् इतिधराहृदयाभिधोमंत्रः अथसुदर्शनमंत्रः ॐसहस्रा
रहुंफट् इतिसप्ताक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिअहिर्बुध्न्यायऋषयेनमः मुखेअनुष्टुप्छंदसेन
मः हृदयेश्रीसुदर्शनायमहाविष्णवेदेवतायैनमः इतिविन्यस्याभीष्टसिद्धयेविनियोगइतिकृतांजलिःकृ
त्वा आचक्रायस्वाहा हृदयायनमः विचक्रायस्वाहाशिरसेस्वाहा सुचक्रायस्वाहा शिखायैधीचक्रायस्वाहा
कवचाय संचक्रायस्वाहा नेत्रायवौषट् ज्वालाचक्रायस्वाहा अस्त्रायफट् इतिमंत्रैःकरषडंगन्यासंकृत्वाध्यानं

कुर्यात् यथा रथांगदरसहस्रदोर्द्दण्डमुसलधनुः पाशांकुशधरंतमर्ककोटिसमप्रभं करांभोरुहैः स्वदेह।
रुचिभिर्जगन्मनसिभासयंतंस्मरेद्धरिरथपदाहृयंविकटभीमदंष्ट्राननं रथांगवक्त्रं दरः शंखः सृणिरंकुशः
दत्ताग्रह्रदयोराद्येनदायधः स्थयोरन्येनदायधस्थयोरपरे तदायधः स्थयोरितिवै इत्याद्युपध्यानं एवंध्यात्वा
जपंकृत्वाजपांतेरक्षादिकंविन्यस्यजपंचसमर्प्यप्रणमेत् इति सुदर्शनमंत्रः अथद्वितीयः सुदर्शनमंत्रः ॐ
नमोभगवतेमहासुदर्शनायमहाचक्रायमहाज्वालायमहादीप्तरूपायसर्वतोमांरक्षमहाबलायस्वाहा इति
षट्चत्वारिंशदक्षरमंत्रेणप्राणायामत्रयंकृत्वारक्षादान्यन्नसर्वंसर्वमंत्रस्यैवकृत्वासमापयेत् इतिद्वितीयो
मंत्रः सुदर्शनस्य अथश्रीकरोमंत्रः ॐनिष्ठश्रीकरस्वाहा इत्यष्टाक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिवामदे
वायऋषयेनमः मुखेपंक्तिछंदसेनमः हृदयेश्रीकरायदेवतायैनमः इतिविन्यस्याभीष्टसिद्धयेविनियोगः
इतिकृतांजलिःकृत्वा भीषयभीषयहुंहृदयायनमः त्रासयत्रासयशिरसेस्वाहा प्रमर्दयप्रमर्दयहुंशिखायैव
षट् प्रध्वंसयप्रध्वंसयहुंकवचायहुं रक्षरक्षहुंअस्त्रायफट् इतिपंचांगमंत्रानुकनिष्ठान्तांगुलिषुनेत्रवर्ज्जंहृदयादि
षुविन्यस्यध्यानंकुर्यात् यथा लोलकतालजालेनफेनिलसोर्मिमालके इत्याद्युपात्तमंत्रमध्येदीपस्थलं।

मे॰
च॰
३८
36

मध्ये शुभं स्फुक्लमयं श्वेतद्वीपं हेमस्थलीकमाकीर्णनानामणिगणैः शुभे वनं संचिंतयेत्तत्र सकलर्तुनिषेविते
कल्पद्रुमसमूहैश्च वारितातपमुत्तमे षट्पदालीकलारावसंकुले लोलपल्लवे पुष्पव्रजपरागौघघनधारपरिस
रिते दिव्यपर्णानांलतानां मणिपुष्पैश्च चंचला इंदिरालीचंक्रमणशीलशक्रमणीरुचे अंगीकरोतियत्रापि परमे
नेऽप्सरसः सुरैः श्रीदार्याभिर्जैश्वर्यसौभाग्यादिगुणैर्युतैः रूपाभिराममधुराकृतिभिः सुकुमारकैः मदस्मि
तलसद्दंतमरीचिद्योतिताननाः मनोज्ञाभिनवेंद्राभामदस्फुरितलोचनाः जल्पाकपुंस्कोकिलायदेवदे
हैर्निरंतरं उद्भिन्नोघकुचद्वा पीनस्तनघटालसाः सश्रोणिभारादल्पर्धमंदगामित्वउत्तमाः एवंभूता
श्चाप्सरसः क्रीडंते यत्र वामोरः मारसेनापतिमिव वनलक्ष्मीगरुदं यथा जन्मस्थानमनंगनावकल्पद्रुतं स्मरेद्दु
धः इंदिरायाः सोदरस्यनवरत्नमयस्य च शिखावलिसमुद्योतिशीतलस्वतले शुभे स्वर्णांकेहिमसंशोभिम
हारत्नमनोरमे उद्यदर्कप्रभाभाभास्वत्पीवलभिहितस्य च प्रसिद्धविकसौघसपतिराजस्य चापरि उपविष्टं
गालिताक्षसुविहाटकसंनिभं रश्मौघमकराकारचारुकुंडलमंडिते किरीटमणिसंदीप्तदिक्चक्रचारुभू
षणं शशिबिंबलसत्कर्बलकसामलविशेषकं अतिचंचलसद्विहिंसकुरोल्लवलगंरके स्मितसंशोभिवक्त्रे

॥

डं कपोलफलकोज्वलं दशनावलिरम्योष्ठद्युतिराजितसुभायं पक्कबिंबाधरं रम्यं रक्तपद्मपलाशवत् आय
ताक्ष्णनेत्रं च सम्यक्कल्पवृक्षविराजितं उरुहारमणिज्वालदीप्तिनिर्मलसङ्कुलं दिव्यरत्नाङ्गदद्योतिबाहुनालधरं
हरिं गदाकमलशंखारिधारिणं बाहुदण्डकैः कपाटविपुलेनाथ कमलानिलयेन च लसत्कौस्तुभदी-
प्तोयविद्योतिततनुतलेन च वत्समासविराजितेन त्रैलोक्यनिलयेन च त्रिवलीशोभिनासम्यग्रोमराजिलसद्दु
वा उदरेण विराजितं रम्यं कटितटेन च पीतपट्टांशुकप्रभाविलसन्माणिमेखलं शरत्तृणसदृकपीनरम्यो
रुपरिभूषितं केकिकंबलसत्कान्तिजंघायुगमनोहरं कोमलाभचरणपादाग्रजितकच्छपं शशरक्तस
दृङ्कान्तिध्वजाब्जाङ्कितपदतलं करसंश्लककमलरमयालिंगितं सदा लसमयाचोपवृंहितं नवमालिकयाशोभि
तं नवयौवनकान्त्यौघसंशोभिसकलाङ्गकं सुरासुरर्षिप्रवरैः सेवितं चाप्सरोगणैः हर्णेडुविंबसदृशवि
तानसमलंकृतं सर्पोषाकराज्वालिलसद्वामरराजितं विपुलतासविलोलवैजयंती सुशोभितं पतवि
द्याधरवृन्दचारणादिनिषेवितं वामाधपयस्य योगदाकमलेनरा सुदृद्योशांखवचक्रेण त्याधुध्यानं इति
ध्यात्वा यथाशक्ति जपं विधाय जपेनेश्वरयादीन् विसृज्य जपं समर्प्य प्रणमेत् इति श्रीकरोमन्त्रः अथ

मं॰ चं॰ ३०
37

द्वितीयः श्रीकरो मंत्रः श्रीमन्नारायणचरणौ शरणं प्रपद्ये श्रीमन्नारायणाय नमः इति चतुर्विंशत्यक्षरमं
त्रेण प्राणायामत्रयं कृत्वा ऋष्यादीन् पूर्ववन्मंत्रोक्तान् विन्यस्य क्लां हृदयं क्लीं शिरः क्लूं शिखा क्लैं कवचं
क्लः अस्त्रमिति पंचांगमेवात्र कनिष्ठान्तास्वंगुलीषु विन्यस्य नेत्रवर्जं हृदयादिषु पंच विन्यस्य पूर्ववन्मंत्रस्य ध्यानं कृ
त्वा जपं विधाय जपांते ऋष्यादीन् विन्यस्य जपं समर्पयेत् इति द्वितीयः श्रीकरो मंत्रः अथ पुरुषोत्तममंत्रः क्लौं
श्रीं शें क्लीं नमः पुरुषोत्तमाय प्रतिरूपलक्ष्मीनिवास सकलजगत्क्षोभण सर्वस्त्रीहृदयविदारण त्रिभुवनमदो
न्मादकर सुरासुरमनुजसुंदरीजनमनांसि तापय २ दीपय २ शोषय २ मारय २ स्तंभय २ द्रावय २ आकर्ष
य २ आवेशय २ परमसुभग सर्वसौभाग्यकर सर्वकामप्रद लक्ष्मीं हन २ चक्रेण गदया खड्गेन सर्वबाणैश्च
भिंद २ पाशेन बंधय २ अंकुशेन ताडय २ त्वर २ किं तिष्ठसि तावत् यावत् समीहितं मे सिद्धं भवति क्लीं हुं फट् न
मः क्लौं श्रीं क्लीं ओं इत्येकाक्षराधिकद्विशतवर्णात्मकमंत्रेण प्राणायामत्रयं कृत्वा शिरसि जैमिनये ऋषये नमः
मुखे विश्वामित्राय छंदसे नमः हृदये श्रीपुरुषोत्तमाय देवतायै नमः इति विन्यस्याभीष्टसिद्धये विनियोगः इति
कृतांजलिः कृत्वा ओं क्लीं पुरुषोत्तम त्रिभुवनोन्मादकर हुं फट् नमः हृदयाय नमः ओं क्लीं सकलजगत्क्षोभण।

लक्ष्मीदीपिने हूं फट् नमः शिरसे स्वाहा ॐ ह्रीं मन्मथोन्मांगजकामदीपिनि हूं फट् नमः शिखायै वषट् ॐ
ह्रीं परमसुभगसर्वसौभाग्यकराय निरूपककेशवस्मर हूं फट् नमः कवचाय हुं ॐ ह्रीं सरासरमत्रजसुंदरी
हृदयविदारणसर्वप्रहरणाय सर्वकामिक हन हन सर्वहृदयं धनान्याकर्षयाकर्षय महाबलाय स्वाहा फट्
ॐ ह्रीं त्रिभुवनेश्वर सर्वजनमनांसि हन २ दारय २ मे वशमानय नेत्राय वौषट् इति नेत्रांतषडंगमंत्रान् गुह्यादि
तलांतकरयोर्विन्यस्य नेत्रमंत्रं कनिष्ठयोर्विन्यस्य हृदयाद्यस्त्रांतं विन्यस्य पश्चान्नेत्रं न्यसेदिति नेत्रांतषडंगमं
त्रान्विन्यस्य ध्यानं कुर्यात् यथा उद्याने संस्मरेद्दीप्ते सर्वपुष्पोपशोभिते वसंतकालविटपिमंजरीराजिरा
जिते मंजरीमरजःपुंजपूरिताशामुखे प्रिये निरंतरपरिध्वानमधुव्रतकदंबके आमोदपूर्णस्याशाभसिद्धिया
णांसुरवशंदे बालस्थे नेत्रिविश्रांते मनोज्ञजननस्थले शृंगारलक्ष्म्याइवसत्केलिसद्मनोरमे रतेरतिस्वावसा
यमस्तूनांजकभूरिव उपमानं मनोज्ञानां नेत्रसाफल्यकारके आश्चर्यभूतवस्तूनां दृष्टांते केवलं प्रिये अस्मि
न्कल्पद्रुमे दिव्ये रत्नवेदीसमाहिते लसन्महानीलमणिमयमूलमनोरमे प्रमयवज्राश्ममयप्रकांडविल
सत्तले मोल्लासिजांबूनदवदीर्घशाखसमन्वितमे दृतिमाणिमयोफदललसमाहितस्मपल्लवे प्रनष्टमणिगुच्छव

सं.
चं.
२८
38

मुक्ताफलविरकैसरंतिपीयपीयूषनिभं मधुप्रष्पोद्भवं रागाञ्जरामतीनैस्सैः षट्पदानां समूहकैः निजपोषि
तममूहैरुपगीयमानैर्विलासिभिः शाखाभुग्नैरर्थिजनव्रजायाग्रुथनव्रजं प्रयच्छंतं सर्वं त्यामीथाराः पुष्परसो
द्भवाः दर्ताग्रुधाराश्रियमुद्वहंतीवव यस्यतं विवर्तमानरुचिरभ्रमरात्पत्तमालकं मूर्द्धायोपनतपाद्योतसेवितं
सुमनोज्जलैः स्नातैनयानपस्यंतं नेते भ्रमततामिव श्रीमंतमंबुजातंतं तस्य मूले मनोहरे माणिक्यकुट्टि
मोद्भूतभूतलेपीनसुन्नमं अरुणांबुजमध्यस्थमस्मितप्रद्योतनप्रभं गरुडं पतिराजंतं स्कंधारूढमध्यासितं
स्मरेद्रथ्यांगपाणिं तु सूर्यकोटिसमप्रभं लावण्यपरिपूर्णांघ्रन्नवयौवनयौवनकोमलं अंगसौंदर्यशोभौघ
पिहितानंगजद्दर्पकं मंदारोलिनरक्तान्तकामबाणौयविद्भुलं माणिभूषणदीप्तांगैर्दिव्यांगंधोचराद्भुतं प्रभ
यारुणयाविश्वं रंजयंतं महेश्वरि यक्षगंधर्वदेवौघकामिनीशतसेवितं नीलकुंचितकेशौघविलसत्तुप्र
सूनकं माध्वीकलोलुपालीनाद्यघनादमनोरमं कंदर्पचापविलसद्भ्रूलालिमरम्बुवं पद्मपत्रविशाला
क्षं लोकनैः कामिनीजनं मोहयंतं महारत्नमौलिद्युतिविराजितं उल्लसद्धिंगुमणिशिलासकलारुणिताधरं
पक्वबिंबाधरं देविनासावंशमनोरमं आलोलकुंडलच्छायासमुद्योतिकपोलकं विलसत्कल्पपुष्पा षद्गमधु

षितमद्दलं वाहुस्कंधेनयाध्यायेत्कणत्कंकणमंडितं अशोकपल्लवाकारविलसद्विद्रुमापमां करायुगल
योर्ध्येया नानारत्नांगुलीयकाः दक्षिणेथ करे चक्रं चिंतयेदर्कभास्वरं खड्गं तयोपरितनेम्रसलचवतद्गतरे तयो
र्दक्षिणे हस्ते चिंतयेद्दविरांकुशं वामोर्द्धे चिंतयेत्पाशं तदधः शंखमेवच मशारंचयत्रर्वामेगदां ध्यायेदधः करे
वक्षस्थले दरेध्यायेल्लक्ष्मीकुचविमर्दितं श्रीवत्सकौस्तुभोद्भासिविशालकमनीयकं मनोरमसमग्रोन्नतिवनमा
लास्वलंकृतं गंभीरदक्षिणावर्तनाभिमंडलमंडितं हेमाभपीतवस्त्रेणसंशोभितघनेस्मरेत् आरक्तनखरैर्वे
स्वंगुलीयैर्विराजितौ रक्तोत्पलनिभौपादौदेवस्थितौध्वजवाबिजैः सव्यतूउरीदरेध्यायेत्लक्ष्मीं सर्वस्वदायकीं वा
मोरौ संस्थितां ध्यायेल्लक्ष्मीं स्वर्णसमप्रभां कणन्नूपुरपादाब्जां हरिद्रुमनितंबिनीं तनुमध्यां स्तनौ तुंगवरुपीनपयो
धरां रणत्कंकणबाहुयुग्मां नानारत्नांगुलीयकां विद्रुमारुणबिंबोष्ठीं नीलोत्पलविलोचनां दीर्घातिकांतिमत्स्निग्ध
नीलकुंचितमूर्द्धजां मुक्तामालां शिरोभागाद्यातां लोलकुंडलां कंठात्स्तनयुगं यावन्मुक्तादामविराजितां तीराब्धि
फेनरुचिरे वस्त्रां श्वेतवाससी दक्षिणेबाहुनादेवं गाढमालिंग्यसंस्थितां प्रियांगसंगमात्स्मेरतज्जातरोमांच
कंचुकां देवस्यासंगसंभावोल्लसत्सर्वांगविमोहितां दक्षिणेदेवदेवस्य गंधपंचमयीगिरं वदंतीं भारतीं ध्याये।

मं॰
वं॰
३५
39

हीरामुक्तकधारिणीं सितवंदनलिप्तांगीं पीनोन्नतपयोधरां विशाललोचनां देवीं मुक्ताहारविभूषणां स्रजंती
लोचनैर्भावान् विस्मोदे विश्वविस्मितां विद्यासौभाग्यलाभाय ध्यायेद्देवपरांगिरं पठितां वा स्वदेवाग्राध्यानमात्रमूर्तये
हरेः प्रणामस्तुत्याहरणैः पीताः क्रमशः सर्वभूषणैः तथा हैत्रि देवदेवस्य परितः सर्वभूषणैः लक्ष्याद्याः शक्तयो
ध्येया रत्नालंकरणावाहुकाः सितचामरधारिण्यो मुक्ताहाराः समध्यमाः कणन्नूपुरपादाब्जाः पीनोत्तुंगपयोधराः
त्रैलोक्यमोहनं देवं वीक्षमाणाः स्मरार्दिताः गौरे लक्ष्मीसरस्वत्यौ रतिप्रीती तथारुणे शशांकधवले ह्येते कांतिकी
तीहरिप्रिये तुष्टिपुष्टी तथा प्रणमेध्यानतश्चेहरिवल्लभे वनरैंद्रदेवदैत्यानां प्रमदाः स्मरविह्वलाः दृष्ट्वा चंदनादी
नि हेमरत्नस्रजः शिवे प्रायांमः परितो ध्येया देवदर्शनलालसाः हेमप्रसूनमालाभिर्वंदनैर्विविधैः शुभैः त्रैलो।
क्यमोहनं देवं पूजयंत्यो निरंतरं ऋषयः सिद्धगंधर्वमनुजामनुजाधिपाः सर्वं मः परितो ध्येयाः हरिसर्वप्रियंप्रिये
इंद्राद्यैर्लोकपालैश्च समंतात्परिवारितं आब्रह्मभुवनांतस्थसर्वलोकैः प्रपूजितं कोटियोजनविस्तीर्णे हेमरत्नवि
निर्मिते मनः प्रीतिकरे देवि साधकाभीष्टदायके धर्माद्यैर्निर्मिते देवि मंडलत्रितयान्विते विमलादिसमाशक्तिस्थयो
गपीठे महाप्रभे आसीनं तं चिंतयेद्देवं सर्वसत्त्वविमोहनं भुवनानि मसादे विभाषयंतं निजात्विषा किन्नरोरगगं

पर्वंवा रोगे स्वेच्छया जैः पीयमानपुराणान्तं सर्ववांछितसिद्धिदं इति ध्यात्वा यथाशक्ति जपं विधाय जपान्ते
ऋष्यादीन् विन्यस्य जपं देवाय समर्प्य गुरुं देवं च प्रणमेत् इति त्रिपुरुषोत्तममंत्रः अथ द्वितीयः पुरुषोत्तममंत्रः
ॐ ह्रीं श्रीं पुरुषोत्तमाय हूं फट् स्वाहा इति त्रयोदशाक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये न
मः मुखे गायत्रीछंदसे नमः हृदि पुरुषोत्तमाय देवाय नमः इति विन्यस्याभीष्टसिद्धये विनियोग इति कृ
तांजलिः कृत्वा ॐ हृत् ह्रीं शिरः श्रीं शिखा पुरुषोत्तमाय कवचं हूं फट् नेत्रं स्वाहा अस्त्रमिमंत्रैः करषडंगन्या
सं विधाय ध्यायेत् यथा संस्मरेत् परमं विभुं रक्तवर्णं चतुर्भुजं शंखचक्रगदापद्मधारिणं पुरुषोत्तमं वामाङ्
केयोराधेन दायघः स्थयोरतो इति ध्यात्वा जपान्ते ऋष्यादिकं विन्यस्य जपं समर्प्य प्रणमेत् इति द्वितीयः पुरु
षोत्तममंत्रः इति श्रीगोस्वामिजनगति वासाज्जगोस्वामिजनार्दनभट्टविरचितायां मंत्रचंद्रिकायां षष्ठः प्रका
शः ६ अथ हृषीकेशमंत्रः ह्रीं हृषीकेशाय नमः इत्यष्टाक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋष
ये नमः मुखे अनुष्टुप् छंदसे नमः हृदये श्रीहृषीकेशाय देवतायै नमः इति विन्यस्याभीष्टसिद्धये विनियो
ग इति कृतांजलिः कृत्वा ह्रीं ह्रीं मित्यादिना करषडंगन्यासं विधाय ध्यायेत् यथा शंखचक्रगदापद्मधारिणं

मं: वं: ८०

स्मरेद्विभुं गरुडोपरिसंविष्टं शुभ्रवर्णं सुभूषणं इतिध्यात्वायथाशक्तिजपंविधायजपांतेरक्षादिकंविन्यस्यज
पंसमर्प्यप्रणमेत् इतिहृषीकेशमंत्रः अथश्रीधरमंत्रः श्रींह्रींश्रींश्रीधरायत्रैलोक्यमोहनायनमः इतिषो
डशाक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिब्रह्मणेऋषयेनमः मुखेगायत्र्यायछंदसेनमः हृदयेश्रीधरा
यदेवतायैनमः इतिविन्यस्याभीष्टसिद्ध्येविनियोगइतिकृतांजलिःकृत्वा श्रांहृत् श्रींशिरः श्रूंशिखा श्रैंकवचं
श्रौंनेत्रं श्रः अस्त्रमितिमंत्रैः करषडंगन्यासंविधायध्यानंकुर्यात् यथा दुग्धाब्धौमकलत्रसेवितवनेद्वीपे
वकल्पद्रुमंतस्याधःकमलोरुपीठविलसन्मूर्तीद्धरम्यासने विभ्राणंकरपंकजैरविदरौसम्यग्गदामंबुजंस्व
र्णाभंमुकुटोल्लसन्मणिरुचादीप्तंभजेश्रीधरं इतिध्यात्वाजपांतेरक्षादीन्विन्यस्यजपंदेवायसमर्प्यप्रणमे
त् इतिश्रीधरमंत्रः अथपरमात्ममंत्रः अच्युतानंतगोविंदायनमः इत्येकादशाक्षरमंत्रेणप्राणायामत्रयंकृ
त्वा शिरसिशौनकायऋषयेनमः मुखेविराजेछंदसेनमः हृदयेपरमात्मनेदेवतायैनमः इतिविन्यस्याभी
ष्टसिद्ध्येविनियोगइतिकृतांजलिःकृत्वा अच्युतायहृदयायनमः अनंतायशिरसेस्वाहा गोविंदायशिखायैव
षट् अच्युतायकवचायहुं अनंतायनेत्रायवौषट् गोविंदायास्त्रायफडितिमंत्रैः करषडंगन्यासंविधायध्यानंकुर्या

त् यथा॰ शंखचक्रधरं देवं चतुर्बाहुं किरीटिनं सर्वायुधैरुपेतं तं गरुडोपरि संस्थितं सनकादिमुनीन्द्रैस्तु
सर्वदेवैरुपासितं श्रीभूमिसहितं देवमुद्यदादित्यसन्निभं प्रातरुद्यत्सहस्रांशुमंडलोपमकुंडलं सर्वलोकस्य
रक्षार्थमनंतं नित्यमेव हि अभयं वरदं देवं धारयंतं मुदान्वितं इति ध्यात्वा जपांते ऋष्यादीन् विन्यस्य जपं
समर्प्य प्रणामं कुर्यात् इति परमात्ममंत्रविधिः अथ नरसिंहमंत्रः उग्रवीरं महाविष्णुं ज्वलंतं सर्वतोमुखं
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं इति त्रिंशदक्षरात्मकस्यानुष्टुपमंत्रेण प्राणायामत्रयं कृत्वा शिर
सि ब्रह्मणे ऋषये नमः मुखे अनुष्टुप्छंदसे नमः हृदये श्रीनृसिंहाय देवतायै नमः इति विन्यस्य सर्वाभि
ष्टसिद्धये विनियोगः इत्युक्त्वा उग्रवीरं हृदयाय नमः महाविष्णुं शिरसे स्वाहा ज्वलंतं सर्वतोमुखं शिखायै
वषट् नृसिंहं भीषणं कवचाय हुं भद्रं मृत्युमृत्युं नेत्राय वौषट् नमाम्यहं अस्त्राय फट् इति मंत्रैः करषडंगन्या
सं कृत्वा ध्यानं कुर्यात् यथा॰ नृसिंहं भजे नानाविधानल्पबाहुं त्रिनेत्रं भुजगोल्लसत्कर्णशं विक्रमानुपमं ज्योतिषाग्रस्त
देहं शिरः शोभिदंष्ट्रा सदीप्तं द्विजिह्वं हतवामयोग्रं कशाब्दौ इति ध्यात्वा जपं विधाय जपांते ऋष्यादीन् वि
न्यस्य जपं समर्प्य प्रणामं कुर्यात् इति नृसिंहमंत्रः अथ द्वितीयो नृसिंहमंत्रः क्ष्रौं इत्येकाक्षरमंत्रेण प्राणाया

मं॰ वं॰ ५८ मत्रयं कृत्वा शिरसि अत्रिऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीनृसिंहाय देवतायै नमः इति विन्यस्या
भीष्टसिद्धये विनियोग इति कृतांजलिः कृत्वा हां हृदयं हीं शिरः हूं शिखा हैं कवचं हौं नेत्रं हः अस्त्रमिति मंत्रैक
रषडंगन्यासं विधाय नृसिंहं भजे इत्यादि पूर्ववद्ध्यात्वा जपं विधाय जपांते ऋष्यादीन्विन्यस्य जपं समर्पयेत् इति
द्वितीयो नृसिंहमंत्रः अथ तृतीयो नृसिंहमंत्रः श्रीं ह्रीं क्लीं क्रौं हूं फट् इति षडक्षरमंत्रेण प्राणायामत्रयं कृत्वा
शिरसि ब्रह्मणे ऋषये नमः मुखे पंक्तिछंदसे नमः हृदये श्रीनृसिंहाय देवतायै नमः इति विन्यस्याभीष्टसि
द्धये विनियोग इति कृतांजलिः कृत्वा श्रां हृदयं शिरः क्लीं शिखा क्रौं कवचं हूं नेत्रं फट् अस्त्रमिति षडंगमं
त्रैः करषडंगन्यासं विधाय ध्यायेत् यथा पायात् कोपप्रदीप्तप्रविकृतवदनः शोणवर्णोग्रनामेत्रद्वंद्वेद्धोध
तीतीव विशाशिहुतभुङ्नेत्रयोरुदंष्ट्रः हस्ताग्रैः स्वकशांखो गुणस्पृक्कुलिशान् सद्गदां दारणाख्या विश्राणेन
भीमकायो विविधमणिगणैर्भूषितो वा नृसिंहः एवं मूर्द्धयोराधेतदा यथपस्थयोरपरेतदा तथा पथः स्थयोरन्येस
वीथः स्थाभ्यां दारणा मुद्राः दारणमुद्रालक्षणं यथा मिथः संश्लिष्टसमुत्थांगुलयोऽकरस्त्वयोमुखाः स्वस्थान
सरलांगुष्ठौ मुद्रैषा दारणा स्मृता इत्यायुधध्यानं एवं ध्यात्वा यथाशक्ति जपं विधाय जपांते ऋष्यादीन्विन्य

५१

स्वजपं समर्पयेत् इति तृतीयो नृसिंहमंत्रः अथ चतुर्थो नृसिंहमंत्रः ॐ ह्रौं नमो भगवते नरसिंहाय
ज्वालामालिने दीप्तदंष्ट्रायाग्निनेत्राय सर्वरक्षोघ्नाय सर्वभूतविनाशनाय सर्वज्वरविनाशनाय दह दह पच पच र
क्ष रक्ष हुं फट् स्वाहा इति ममषष्ठतरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि प्रजापतये ऋषये नमः मुखे गा
यत्र्याय छंदसे नमः हृदये श्रीनरसिंहदेवताय नमः इति विन्यस्याभीष्टसिद्धये विनियोग इति कृतांजलिर्भू
त्वा ॐ ह्रौं नमो भगवते नरसिंहाय हृदयाय नमः ज्वालामालिने दीप्तदंष्ट्राय शिरसे स्वाहा अग्निनेत्राय सर्व
रक्षोघ्नाय शिखायै वषट् सर्वभूतविनाशनाय सर्वज्वरविनाशनाय कवचाय हुं दह दह पच पच रक्ष रक्ष ने
त्राय वौषट् हुं फट् स्वाहा अस्त्राय फट् इति करषडंगन्यासं विधाय ध्यायेत् यथा उद्यत्कालानलाभं प्रलय
हुतवहोद्दीप्तदंष्ट्रोत्कटास्यं विद्युद्दामाभिरामप्रचुरघनसटाटोपभीमं त्रिनेत्रं हस्ताग्रैः शंखचक्रे दधतमसिव
रं खेटकं श्रीनृसिंहं वंदे दैत्यांतकं तं मुनिसुरनिकरैः स्तूयमानं सदेव वामोर्द्धादिनद्योतमाश्रुयध्यानं असिव
रं खड्गश्रेष्ठमितरथे इति ध्यात्वा जपं विधाय ऋष्यादीन् विन्यस्य जपं समर्पयेत् इति चतुर्थो नृसिंहमंत्रः
अथ पंचमो नृसिंहमंत्रः ॐ श्रीं ह्रीं श्रीं जय लक्ष्मीप्रियाय नित्यप्रमुदितचेतसे लक्ष्मीश्रितार्द्धदेहाय श्रीं ह्रीं श्रीं नमः

मं॰
व॰
४२
42

इति त्रयस्त्रिंशदक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि प्रजापतये ऋषये नमः मुखे अनुष्टुप्छंदसे नमः हृदि श्री
लक्ष्मीनृसिंहाय देवतायै नमः इति विन्यस्याभिष्टसिद्धये विनियोगः इति कृत करसंपुटश्चोत्क्रां त्वां त्वीमित्या।
दिभिर्मंत्रैः करषडंगन्यासं विधाय ध्यानं कुर्यात् यथा सर्पेंद्रभोगनिलयः स्वफणातपत्रो विप्रुच्छशोककृत्विरः
परमो नृसिंहः श्र्यालिंगितश्चरमयावतु दिव्यभूषो हृत्सेवंरारिकमलाभयदान् दधानः इतो यः करमारभ्य वा
माधः करपर्यंतमापुयध्यानं· इति ध्यात्वा जपांते ऋष्यादीन् विन्यस्य जपं देवाय समर्प्य प्रणामं कुर्यात् इति लक्ष्मी
नृसिंहमंत्रः अथ द्वितीयो लक्ष्मीनृसिंहमंत्रः ॐ श्रीलक्ष्मीनृसिंहाय इत्यष्टाक्षरमंत्रेण प्राणायामत्रयं कृ।
त्वा शिरसि प्रजापतये ऋषये नमः मुखे अनुष्टुप्छंदसे नमः हृदये श्रीलक्ष्मीनृसिंहाय देवतायै नमः इ
ति विन्यस्य त्रां त्रीमित्यादिना करषडंगन्यासं विधाय सर्पेंद्रभोगनिलय इत्यादि पूर्ववद्ध्यात्वा जपांते ऋष्या
दीन् विन्यस्य जपं समर्पयेत् इति द्वितीयो लक्ष्मीनृसिंहमंत्रः अथ तृतीयो लक्ष्मीनृसिंहमंत्रः जपजयश्री
नृसिंह इत्यष्टाक्षरमंत्रेण प्राणायामत्रयं कृत्वा ऋषिषडंगादिकं पूर्वोक्ताष्टाक्षरमंत्रवत् इति तृतीयो नृसिं
हमंत्रः अथान्यो नृसिंहमंत्रः क्षौं मत्स्याय क्षौं कूर्माय क्षौं वराहाय क्षौं नृसिंहाय क्षौं वामनाय क्षौं रामाय क्षौं रा

निर्मलांगाम्भ्रियं विष्णुं पीतकौशेयवाससं सर्वतो घनमानेन तेजसा भास्करप्रभं किरीटांगदहाराद्यैर
नर्घ्याभरणादिभिः ग्रैवेयकंकणाद्यैश्च भूषणैर्भूषितांगकं चक्रशंखौ च गदा धारयंतं करांबुजैः कौ
स्तुभप्रभया दीप्तं मणिकुंडलमंडितं भजेऽहं सर्वसंपत्त्यै फुल्लांबुजसंस्थितं वामाधःकरमारभ्य दक्षाधः
करपर्यंतमायुधध्यानं इति ध्यात्वा यथाशक्ति जपं विधाय जपांते ऋष्यादिकं विन्यस्य जपं समर्प्य प्रणमेत्
इति प्रणवाद्यक्षरमंत्रः अथ कार्तवीर्यार्जुनमंत्रः फ्रों ब्रीं क्लीं भ्रूं आं ह्रीं क्रों श्रीं हुं फट् कार्तवीर्यार्जुना
य नमः इत्येकोनविंशत्यक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ऊं दत्तात्रेय ऋषये नमः मुखे ऊं अनु
ष्टुप्छंदसे नमः हृदये श्रीकार्तवीर्यार्जुनाय देवतायै नमः इति विन्यस्य मम सर्वाभिसिद्धये विनियोग

अयमेव प्रणवादि विंशत्यक्षरो भवति

ग्रां ह्रीं

इति कृत्वांजलिं कृत्वा मूलमंत्रेण करयोर्व्यापकं विन्यस्य ॐ फ्रों व्रीं हृदयाय नमः ॐ क्लीं भ्रूं शिरसे स्वाहा [illegible] शि
खायै वषट् ॐ श्रीं कवचाय हुं फट् अस्त्राय फट् इति पंचांगमंत्रान् अंगुष्ठादिकनिष्ठान्तास्वांगुलीषु विन्यस्य नेत्र
वर्जं हृदयादि पंचांगेषु विन्यस्य ॐ कार्तवीर्यार्जुनाय नमः इति सर्वांगे व्यापकं कृत्वा [illegible] ध्यानं कुर्यात् य
था श्यामात्सर्वभयात्प्रकाशिततनुः प्रद्योतनोद्योतितः स्वर्णस्रक्कृपवीतकंधरधरो रक्तोष्णकोषीषवान्ः
नानाकल्पवि[illegible]भूषितः करसहस्रार्जुनवाणासनो वाणाग्नाड्वमहस्रवाहुरनिशं भूवल्लभोनः प्रभुः स
सहीपैकनाथः सवित्समप्रकृविः सर्वंड्गतकोनः पापादन्नायतात्तोरथ्यवरनिलयः स्थूलकायो तिभीमः
वा पात्रे भुवि लोकीकरधृतनयनुषोनिः स्वनैस्त्रासयानः सश्रीमान् कार्तवीर्यो निखिलरूप[illegible]कारी
इति ध्यात्वा यथाशक्ति जपं विधाय जपांते स्वरुपादिकं विन्यस्य जपं देवाय समर्प्य प्रणमेत् इति कार्तवीर्यार्जु
नमंत्रः अस्य मंत्रस्य कार्यपरत्वान्मंत्रध्यानभेदा वहवः संति ते तंत्र यथवाहुल्याद्गत्र न कथिताः इति गोस्वामी
जगन्निवासात्मज गोस्वामि जनार्दन विरचितायां मंत्रचंद्रिकायां नवम प्रकाशः इति वैसव प्रकरणं समाप्तं
अथ मोरसंजग्रथांते नत्वा [illegible] तां सूर्यमंत्रः ॐ घृणिः सूर्य आदित्य इति मंत्रेण प्राणायामत्रयं कृत्वा शिरसि

दाव

नतां घ्राम्बुजः द्विप्र=

सं. चं. ६२

63

देवभागायऋषयेनमः मुखेगायत्र्यायछंदसेनमः हृदयेश्रीसूर्यायदेवतायैनमः इतिविन्यस्य सत्यतेजोज्वा
लामणिहुंफट्स्वाहा हृदयायनम ब्रह्मतेजोज्वालामणिहुंफट्स्वाहा शिरसेस्वाहा विष्णुतेजोज्वालामणिहुं
फट्स्वाहाशिखायैवषट् रुद्रतेजोज्वालामणिहुंफट्स्वाहाकवचायहुं अग्नितेजोज्वालामणिहुंफट्स्वाहानेत्रा
यवौषट् सर्वतेजोज्वालामहुंफट्स्वाहा अस्त्रायफडितिमंत्रैः करषडंगन्यासंविधायध्यानंकुर्यात् यथा भा
स्करंमंगदकुंडलमुखंवारुणगरुणाकजंमस्य अक्षगुणाभयदानकरंतंरक्तनेत्रभजेः गुणेनत्र दानंवरं कु
हुकरयोः पद्मेवामागुधस्थयोरभयदाने इत्याद्युपध्यानं इतिध्यात्वायथाशक्तिजपंविधायजपांतेऽर्घ्यादि
कंविन्यस्यजपंदेवायसमर्प्यप्रणमेत् इत्यष्टाक्षरः सूर्यमंत्रः अथपूर्वतरःसूर्यमंत्रः खखोल्कायस्वाहा इति
मंत्रेणप्राणायामत्रयंकृत्वाशिरसिब्रह्मणेऋषयेनमः मुखेगायत्रीछंदसेनमः हृदयेश्रीसूर्यायदेवतायै
नमः इतिविन्यस्य सत्यतेजायस्वाहाहुंफट् हृतः हुंफट् इतिस्वाहांतेपंचांगेष्वपिविन्येत् सत्यतेजसेस्वा
हाशिरः सत्यकारायस्वाहाशिखा सत्यवालायस्वाहाकवचं सत्यकायस्वाहाहुंफट् अस्त्रायफडितिपंचां
गमंत्रानेतष्टादिकनिष्ठांतांस्वांगुलीषुविन्यस्यनेत्रवर्जंहृदयादिष्वपिविन्यस्य यद्वामंत्रांतरैः षड्भिःषडंग

न्यासं विधाय ध्यायेत् यथा रक्तपद्मद्वयं हस्तैर्विभ्राणं वरदाभये केयूरकाभं त्रिनेत्रं रविं ध्यायेत् स्वभूषितं इति
ध्यात्वा यथाशक्ति जपं विधाय जपान्ते ऋष्यादिकं विन्यस्य जपं समर्पयेत् इति षडक्षरः सूर्यमंत्रः अथ सप्ता
क्षरः सूर्यमंत्रः खखखोल्काय स्वाहा इति मंत्रेण प्राणायामत्रयं कृत्वा ऋष्यादिन्यासषडंगादिकं पूर्वोक्तषड्
क्षरसूर्यमंत्रवत् कुर्यात् इति सप्ताक्षरः सूर्यमंत्र अथ चतुर्वर्णो मंत्रः ॐ ह्रीं हंसः इति मंत्रेण प्राणायामत्रयं
कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्री छंदसे नमः हृदये श्रीसूर्यरूपिणीभवते सूर्यै देवतायै नमः
इति विन्यस्य विनियोगमुक्त्वा ॐ हृत् ह्रीं शिरः ॐ शिखा ह्रीं कवचं ॐ नेत्रं ह्रीं अस्त्रमिति मंत्रैः करषडंगं वि
धाय ध्यायेत् यथा भास्वद्रत्नसहस्रमौलिविलसत्कुंडलाढ्यमुद्योतय हस्ताब्जैर्दधदंकुशं गुणवराभीतीः
सतैगजस्तनां पाशाङ्कुशालिंगितकांचनाभुजजपाविद्युज्ज्वलत्कांतिभिर्विश्वं द्योतयदार्कमाश्वशिशिरं वि्श्व
शिकायावपुः दत्ताद्वह्योराघ्येतदायधः स्यथोरव्ये इति श्रावुपध्यानं इति ध्यात्वा यथाशक्ति जपं विधा
य जपान्ते ऋष्यादिकं विन्यस्य जपं देवाय समर्प्य प्रणमेत् इति चतुर्वर्णो मंत्रः अथ अष्टाक्षरो मंत्रः ह्रां ह्रीं सः
इति मंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्र्याय छंदसे नमः हृदये श्रीसूर्याय दे

मं
वं
६४

64

वतायै नमः इति विन्यस्य विनियोगमुच्चार्य क्रां ह्रीमित्यादिना करषडंगन्यासं विधाय ध्यायेत् यथा अरुण
कमलसंस्थं श्रीतरुणि भूरिभूषं वरुणकमलयुग्माभीष्टदाभीतिहस्तं अरुणतरशरीरं भावयामो दिनेशं अरु
णकरसमेतं सर्ववेदैकवेद्यं इति ध्यात्वा यथाशक्ति जपं विधाय जपान्ते अर्घ्यादिकं विन्यस्य जपं देवाय समर्प्य
प्रणमेत् इति अपरो मन्त्रः अथ अपरः सूर्यमन्त्रो विजयाविधः ह्रूं पैं इति मन्त्रेण प्राणायामत्रयं कृत्वा शि
रसि ब्रह्मणे ऋषये नमः मुखे गायत्राय छंदसे नमः हृदये श्रीभानवे देवतायै नमः इति विन्यस्य विनियो
गमुच्चार्य ह्रां हृदयं ह्रीं शिरः ह्रूं शिखा ह्रैं कवचं ह्रौं नेत्रत्रयं ह्रः अस्त्रमिति मन्त्रैः करषडंगन्यासं विधाय ध्याये
त् यथा पद्मयुग्मवराभीतीर्दधानं करपंकजैः रक्तपद्मास्थितं भानुं रक्तं ध्यायेत्त्रिलोचनं इति ध्यात्वा यथाश
क्ति जपं विधाय जपान्ते अर्घ्यादिकं विन्यस्य जपं देवाय समर्पयेत् इति विजयाभिधो अपरः सूर्यमन्त्रः अ
थान्यो अपरो मन्त्रः हंसः इति मन्त्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे देवीगायत्री
छंदसे नमः हृदये श्रीपरमात्मने देवतायै नमः इति विन्यस्य विनियोगमुच्चार्य ह्रां ह्रीमित्यादिना कर
षडंगन्यासं विधाय ध्यायेत् यथा रक्ताब्जकांचननिभं गुणटंकपद्मैर्हंसैरभीतिवरदे दधतं तु नस्य गौरी

३६
६३

हृं कंकलितं वपुरास्ययामः सौम्याग्निरूपमनिशं गिरिजार्द्धभागं इति ध्यात्वा यथाशक्ति जपं विधाय जपां
ते ऋष्यादिकं विन्यस्य जपं देवाय समर्प्य प्रणमेत् इत्यघोरान्तरोमंत्रः अथैकान्तरोमार्तंडभैरवोमंत्रः ह्सौं इ
ति मंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे निचृच्छंदसे नमः हृदये श्रीमार्तंडभैरवा
य देवतायै नमः गुह्ये ह्सं बीजाय नमः पादयोः विंदवे शक्तये नमः नाभौ रं कीलकाय नमः इति विन्यस्य विनियो
गमुद्धार्य ह्रां हृदयाय नमः ह्रीं शिरसे स्वाहा ह्रूं शिखायै वषट् ह्रैं कवचाय हुं ह्रः अस्त्राय फट् ह्रौं ने
त्रायवौषट् इति करयोः कनिष्ठान्तं हृदयादिषु नेत्रान्तं च विन्यस्य ध्यायेत् यथा स्वर्णाभीपीतजपानिभं त्रिनय
नं शुक्लालसज्ञारिणं खड्गांगारिशुणास्त्रथ्याजपटीपद्मं च शंखांकुशौ रत्नाढ्रे दधतं कापालममलं सद्वल्लभा
लिंगितं मार्तंडं मणिवद्धरत्नमुकुटं ध्यायेच्चवेदाननं रत्नोद्दीदिवद्धंगादिचत्वारिवामोर्द्धादिपद्मादीनि चत्वा
रि प्रेयानि वेदाननं चतुर्मुखं विनयने प्रतिवक्त्रमिति शेषः अप्यवार्द्धिषट्कान्तमिति नारायणीयोक्तेः
इति ध्यात्वा यथाशक्ति जपं विधाय जपांते ऋष्यादिकं विन्यस्य जपं समर्पयेत् इत्येकान्तरोमार्तंडभैरवमं
त्रः इति सूर्यमंत्राः अथ चंद्रमंत्रः सोमाय नमः इति षडक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि भृगुऋष

सौं

मं॰
वं॰
६५
65

येनमः मुखेपंक्तिछंदसेनमः हृदयेश्रीचंद्रमसेदेवतायेनमः गुह्येसोंबीजायनमः पादयोःनमःशक्तयेन
मः इतिविन्यस्यविनियोगमुच्चार्यः स्रांस्रीमित्यादिनाकरषडंगन्यासंविधायध्यानंकुर्यात् यथा श्वेताब्जस्थः
स्फटिकरजतवर्णत्मत्कांतिरुचैर्मुक्ताहारप्रलम्बितनवनीलकेशोवरम्यः हस्ताब्जाभ्यांकुमुदवरदेधारयन्तः
शशांकोभ्रमैर्भूयाद्दमिमतरमाभ्रुचकोयत्कलंकः वामदत्तभ्यांकुमुदवरदे इतिध्यात्वायथाशक्तिजपंविधा
यजपांतेऋष्यादिकंविन्यस्यजपंसमर्पयेत् इतिचंद्रमंत्रः अथभौममंत्रः अंअंगारकायनमः इत्यष्टाक्षरम
त्रेणप्राणायामत्रयंकृत्वाशिरसिब्रह्मणेऋषयेनमः मुखेगायत्रीछंदसेनमः हृदयेश्रीभौमायदेवतायेनमः
इतिविन्यस्य आंईमित्यादिनाषड्दीर्घभाजाबीजेननमः स्वाहेत्यादियुक्तेनषडंगंविधायध्यानंकुर्यात् यथा
नमाम्यंगारकंरक्तरक्तांबरविभूषणं जानुस्थवामहस्ताढ्यंसाभयेतरपाणिकं इतिध्यात्वायथाशक्तिजपंवि
धायऋष्यादिकंविन्यस्यसमापयेत् इतिभौममंत्रः अथबुधमंत्रः बुंबुधायनमः इतिषडक्षरमंत्रेणप्राणाया
मत्रयंकृत्वा शिरसिब्रह्मणेऋषयेनं मुखेपंक्तिछंदसेनमः हृदयेबुधायदेवतायेनमः इतिविन्यस्यबांबी
मित्यादिनाकरषडंगन्यासंविधायध्यायेत् यथा वंदेबुधंसदादेवंपीतांबरसभूषणं जानुस्थवामहस्ता

पंसाभयेनरपाणिकं इतिध्यात्वायथाशक्तिजपंविधायजपान्तेऋष्यादिकंविन्यस्य जपंसमर्पयेत् इति
बुधमंत्रः अथगुरुमंत्रः ब्रंबृहस्पतयेनमः इत्यष्टाक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिब्रह्मणेऋष
येनमः मुखेअनुष्टुप्छंदसेनमः हृदयेश्रीगुरवेदेवतायैनमः इतिविन्यस्यविनियोगमुच्चार्यंब्रांब्रीमित्या
दिनाकरषडंगन्यासंविधायध्यायेत् यथाः रत्नस्वर्णांशुकादीनिदत्तपाणिंपंकजनालिकेरन् अन्यादन्यहुल
राज्ञोनिधेयोऽमरसद्गुरुः इतिध्यात्वायथाशक्तिजपंविधाय जपान्तेऋष्यादिकंविन्यस्यजपंसमर्पयेत्
इतिगुरुमंत्रः अथशुक्रमंत्रः शुंवस्त्वंमेदेहिशुक्रायनमः इत्येकादशाक्षरमंत्रेणप्राणायामंकृत्वाशिरसिब्र
ह्मणेऋषयेनमः मुखेविराट्छंदसेनमः हृदयेशुक्रायदेवतायैनमः इतिविन्यस्यविनियोगमुच्चार्य
शुंहृदयायनमः वस्त्वंशिरः मेशिखा देहिकवचं शुक्रायनेत्रंनमः अस्त्रमितिमंत्रैः करषडंगन्यासं
विधायध्यायेत् यथा शुक्लंनमाम्यापणसंस्थशुक्राभंकरभूषणं स्वर्णवासोरत्नधाराविन्माशनकारहयं
इतिध्यात्वायथाशक्तिजपंविधायजपान्तेऋष्यादिकंविन्यस्यजपंदेवायसमर्पयेत् इतिशुक्रमंत्रः अथ
शनैश्चरमंत्रः शंशनैश्चरायनमः इत्यष्टाक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिब्रह्मणेऋषयेनमः मुखे

मं॰
चं॰
६६
66

गायत्र्यायच्छंदसेनमः हृदयेशानेश्वरायदेवतायैनमः शांशीमित्यादिनाकरषडंगन्यासंविधायध्यानंकुर्यात्
यथा वंदेशानेश्वरंवक्रदंष्ट्रंनीलविभूषणं वामजानुस्थितकरंसाभयान्यकरांबुजं इतिध्यात्वायथाशक्तिज
पंविधायजपाख्यादिकंविन्यस्यजपंदेवायसमर्पयेत् इतिशानेश्वरमंत्रः अथराहुमंत्रः रांराहवेनमः इतिषड
क्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिब्रह्मणेऋषयेनमः मुखेगायत्र्यायच्छंदसेनमः हृदयेराहवेदेवता
यैनमः इतिविन्यस्यविनियोगमुक्त्वारांरींरूमित्यादिनाकरषडंगन्यासंविधायध्यायेत् यथा वंदेराहुंधू
म्रवर्णंसर्पकायंकृतांजलिं विकृतास्यंरक्तनेत्रंधूम्रालंकारमन्वहं इतिध्यात्वायथाशक्तिजपंध्यायजपा
ख्यादिकंविन्यस्यजपंदेवायसमर्पयेत् इतिराहुमंत्रः अथकेतुमंत्रः कें केतवेनमः इतिषडक्षरमंत्रेणप्रा
णायामत्रयंकृत्वाशिरसिब्रह्मणेऋषयेनमः मुखेपंक्तिश्छंदसेनमः हृदयेकेतवेदेवतायैनमः इतिविन्य
स्यविनियोगमुक्त्वा कांकींकूमित्यादिनाकरषडंगन्यासंविधायध्यायेत् यथा वंदेकेतुंकृष्णवर्णंकृष्णव
स्त्रादिभूषितं वामोरून्यस्तहस्तंसाभयान्यकरांबुजं इतिध्यात्वायथाशक्तिजपंविधायजपांतेजपाख्यादि
कंविन्यस्यजपंसमर्पयेत् इतिकेतुमंत्रः अथैतेग्रहमंत्राः सौकर्यार्थमुक्त्वाअनंतपंचायतनंतानर्गलेनेति अथ

ग्निमंत्रः ॐ भूर्भुवः स्वः स्वाहा इति समासतरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि भृगवे ऋषये नमः मुखे गायत्री
छंदसे नमः हृदये अग्नये देवतायै नमः गुह्ये रं बीजाय नमः पादयोः स्वाहा शक्तये नमः इति विन्यस्य विनि
योगमनुष्ठाय ॐ सहस्रार्चिषे नमः हृदयाय नमः ॐ स्वस्तिपूर्णाय शिरसे स्वाहा ॐ उत्तिष्ठपुरुषाय शिखायै
वषट् ॐ धूमव्यापिने कवचाय हुं ॐ सप्तजिह्वाय नेत्राय वौषट् ॐ धनुर्धराय अस्त्राय फट् इति षडंगमंत्रान्
गुष्ठादिकरतलांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यसेत् अथ ध्यानं करैर्वरस्वस्तिकशक्तिभी
तीर्दधानमंभोजगतं त्रिनेत्रं सिंदूरवर्णं तपनीयभूषं वह्निं जटाभूषितमालिमीडे इति ध्यात्वा यथाशक्ति
जपं विधाय जपांते ऋष्यादिकं विन्यस्य जपं समर्प्य प्रणमेत् इति समासतरो वह्निमंत्रः अथान्योग्निमंत्रः
ॐ भूर्भुवः स्वरग्निजातवेद इहावह सर्वकर्माणि साधय स्वाहा इति पंचविंशत्यक्षरमंत्रेण प्राणायामत्रयं
कृत्वा पूर्वमंत्रवदृष्यादीन् विन्यस्य ॐ भूर्भुवः स्वः स्वेन अग्निर्जातवेदसे रत इहावह शिखा सर्वकर्माणि
कवचं साधय नेत्रं स्वाहा अस्त्रमिति मंत्रैः करषडंगन्यासं विधाय पूर्वमंत्रोक्तं ध्यानं कृत्वा यथाशक्ति जपं वि
धाय जपांते ऋष्यादिकं विन्यस्य जपं समर्पयेत् इति पंचविंशाक्षरोग्निमंत्रः अथ पूर्ववदृष्यादिकं विन्यस्य

मं॰
चं॰
६२
67

उँ निष्कलुषाय नेत्र हविर्विगतशिरः लोहिताय शिखा देहि मे कवचं रक्षायेति नेत्रं स्वाहास्त्रमिति मंत्रैः कर
षडंगन्यासं विधाय ध्यायेत् यथा देवमाध्यस्थमपरं रक्तमादिप्रभं केनियातमध्याक्रांतं वर्षंतं धनधान्यरत्ननिचया
नुकंपैः स्वकैः सततं ज्वालापल्लवितस्फुरोमविवरं भक्तार्त्तिभेदनं वंदे धर्मविमुक्तार्थमोक्षफलदं दिव्याकृतिं
पावकं इति ध्यात्वा यथाशक्ति जपं विधाय जपांते ऋष्यादीन् विन्यस्य जपं समर्प्य प्रणमेत् इति चतुर्विंशत्य
क्षरोग्निमंत्रः इति श्रीगोस्वामिनगनिवासात्मजगोस्वामिजनार्दनभट्टविरचितायां मंत्रचंद्रिकायां दशमः प्र
काशः १० इति सूर्यप्रकरणं समाप्तं अथ शैवमंत्रा उच्यंते तत्रादौ षडक्षरो मंत्रः ॐ नमः शिवाय इमं मंत्रेण प्रा
णायामत्रयं कृत्वा शिरसि वामदेवाय ऋषये नमः मुखे पंक्तिछंदसे नमः हृदये श्रीसदाशिवाय देवतायै नमः
इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः इति कृतांजलिः कृत्वा उँ हृत् न शिरः मः शिखा शि
कवचं वा नेत्रं य अस्त्रमिति षडक्षरैर्नमः स्वाहेत्यादिभिर्युक्तैः करषडंगन्यासं विधाय ध्यानं कुर्यात् यथा गोक्षी
रफेनधवलं रजताद्रिसमप्रभं चारुचंद्रकलाराजज्जटामुकुटमंडितं पंचवक्त्रधरं शंभुं प्रतिवक्त्रं त्रिलोचनं
शार्दूलचर्मवसनं रत्नाभरणभूषितं दक्षोर्ध्वहस्ते परशुं वरं च तदधः करो वामोर्ध्वहस्ते हरिणं दधानमभयं प

ष

योगः ३

रे॥ सप्रसन्नमुखांभोजं त्रिनेत्रं विष्टपप्राविष्टे ब्रह्मविष्णुमहेंद्राद्यैः स्तुतं भक्त्या समागतैः विश्वाद्यं विश्ववपुषं भव
तीतिदं शिवं इति ध्यात्वा जपं विधाय जपांते ऋष्यादिकं विन्यस्य जपं समर्पणमेत् इति षडक्षरो मंत्रः अथ
पंचाक्षरो मंत्रः नमः शिवाय इति मंत्रेण प्राणायामत्रयं विधाय शिरसि ब्रह्मणे ऋषये नमः मुखे देवीगाय
त्री छंदसे नमः हृदये परमात्मने देवतायै नमः इति विन्यस्य मोक्षार्थे विनियोग इति कृतांजलिरुक्त्वा पं
चाक्षरैः समस्तमंत्रेण च षडंगं विधाय पूर्वोक्तषडक्षरवद्ध्यात्वा जपं विधाय जपांते ऋष्यादिकं विन्यस्य जपं सम
र्पणमेत् इति पंचाक्षरः मायया यंत्रयोयुक्तः पंचार्णः सप्तवर्णकः षडर्णः स्यात् अष्टवर्णः स्यादेवं मंत्रद्वयं भवे
त् यथा ह्रीं नमः शिवाय ह्रीं अयं सप्ताक्षरो मंत्रः ह्रीं ॐ नमः शिवाय ह्रीं अथ मष्टाक्षरो मंत्रः ऋषिरेकोवा
मदेवः पंक्तिः छंद उदाहृते उमापतिर्देवतास्यात् मंत्रयोर्जगदीश्वरः मंत्रयोः सप्ताक्षराष्टाक्षरयोः इति ऋष्यादि
कं विन्यस्य सर्वाभीष्टसिद्धये विनियोग इति कृतांजलिर्वदेत् ततः ॐ ह्रां ॐ हृदयाय नमः ॐ ह्रीं नं शिरसे स्वाहा
ॐ ह्रूं मं शिखायै वषट् ॐ ह्रैं शिं कवचाय हुं ॐ ह्रौं वां नेत्राय वौषट् ॐ ह्रः यः अस्त्राय फट् इति मंत्रैः करषडंगन्या
सं विधाय ध्यायेत् यथा बंधूककसमारक्तं चंद्रार्द्धकृतशेखरं दक्षिणोर्द्धकरे शूलं तदधो वरमुद्रिकां वामो

ह्रीं ॐ नमः शिवाय ह्रीं

गणेश्वरेति नन्दिनः संबोधनम् ध्यानस्य लिङ्गपुराणोक्तशिवनन्दिनोः संवादे स्थितत्वात् नन्दी
ति शिवस्य प्रमथनामको योगगणालयेश्वरः

प्र

मं.
चं.
९८

68

हूँनकपालंनदधोदस्तेनखङ्गाभयं दधानंनिजवामोरुपीठस्थायागणेश्वर रक्तोत्पलकरायाश्चश्लिष्टंतेवामबा
हुना सर्वाभरणसंपन्नदीप्तदेहदेव्यामुदान्वितं स्मेरवक्त्रंत्रिनयनंसर्वाभरणभूषितं इतिध्यात्वाजपंतेअर्घ्या
दिकंविन्यस्यजपंसमर्पयेत् इतिसप्तात्तराक्षरमंत्रो अथप्रासादाख्योमंत्रः हौं इत्येकाक्षरमंत्रेणप्राणाया
मत्रयंकृत्वाशिरसिवामदेवायऋषयेनमः मुखेपंक्तिछंदसेनमः हृदयेश्रीसदाशिवायदेवतायैनमः गु
ह्येहंबीजायनमः पादयोरौंशक्तयेनमः इतिविन्यस्यसर्वाभीष्टसिद्धयेविनियोगः इतिकृत्वांजलिंकृत्वा हां
हृत् ह्रींशिरः हूंशिखा हैंकवचाय हौंनेत्रं हः अस्त्रमितिमंत्रैः करषडंगन्यासंविधायध्यायेत् यथा मु
क्ताविद्युत्पयोदस्फटिकारुणवर्णैस्तुपंचभिः वदनैः शोभितंवक्त्रघनिवद्धंत्रिलोचनं चंद्रावतंसविलसज्जटा
मुकुटमंडितं शुद्धस्फटिकसंकाशंसमासीनंसरोरुहे प्रसन्नवदनांभोजंदधानंकरपंकजैः दक्षिणैस्त्रि
शिखंटंकंवज्रंखड्गंतनयानलं सर्पंघंटांसृणिंपाशमभयंवामबाहुभिः नानाभरणसंदीप्तंध्यायेदेवंस
दाशिवं इतिध्यात्वायथाशक्तिजपंविधायअर्घ्यादिकंविन्यस्यजपंसमर्पयेत् इतिप्रासादाख्योमंत्रः अ
थाघोराख्योमंत्रः ॐ ह्रीं ह्रौं नमः शिवाय इतिमंत्रेणप्राणायामत्रयंकृत्वाशिरसिवामदेवायऋषयेनमः

मुखे पंक्तिश्छन्दसे नमः हृदये महाशिवाय देवतायै नमः इति विन्यस्य विनियोगमुक्त्वा ह्रां ह्रीं ॐ हृदया
य नमः ह्रीं ह्रीं नं शिरसे स्वाहा ह्रूं ह्रूं मं शिखायै वषट् इत्यादिना करषडंगन्यासं विधाय ध्यायेत् यथा सिं
दूरपुञ्जशोणाङ्गं स्मेरवक्त्रं त्रिलोचनं मणिमौलिलसद्बद्धकलालंकृतमस्तकं दक्षिणोर्ध्वकरे टंकं दधानं
तदधो वरं वामोर्ध्वे च हरिणं तदधः करमादरात् पीनस्तनवतीमङ्गसंस्थितायाः विनिवेश्य च वामांके सन्नि
विष्टायाः प्रियायाः रक्तपंकजे दधन्नादक्षिणेस्ववामीने रक्तपंकजे नानाभरणसंदीप्तं दिव्यगंधसमुज्ज्वलं
एवं ध्यात्वा जपं विधाय चरण्यादिकं विन्यस्य जपं समर्पयेत् इत्यन्योऽपि ध्यानांतरो मंत्रः अथ षट्त्रिंशदक्षरो दक्षि
णामूर्तेर्मंत्रः ॐ ह्रीं दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने ध्यानैकनिरताङ्गाय नमो रुद्राय शंभवे ह्रीं
ॐ इति मंत्रेण प्राणायामत्रयं कृत्वा शिरसि शुकाय ऋषये नमः मुखे अनुष्टुप्छन्दसे नमः हृदये श्रीद
क्षिणामूर्तये देवतायै नमः गुह्ये ॐ बीजाय नमः पादयोः ह्रीं शक्तये नमः इति विन्यस्य मम चतुर्विधपुरुषार्थ
सिद्ध्यर्थे विनियोग इति कृतांजलिरुक्त्वा ॐ ह्रीं दक्षिणामूर्तये ह्रां हृदयाय नमः ॐ ह्रीं तुभ्यं ह्रीं शिरसे स्वाहा
ॐ ह्रीं वटमूलनिवासिने ह्रूं शिखायै वषट् ॐ ह्रीं ध्यानैकनिरताङ्गाय ह्रैं कवचाय हुं ॐ ह्रीं नमो रुद्राय ह्रौं नेत्रा

मं॰
वं॰
६४
69

पवैषर गेहे श्रीशंभवे रूः श्रुत्वापफट् शक्षिवृंगमंचानं गुह्यादिकरतलांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपि
विन्यस्य ध्यायेत् यथा हेमाचलतटरम्ये सिद्धकिन्नरसेविते विविधद्रुमशाखाभिः सर्वतो वारितातपे सुप्र
ष्पितलतानालैराश्लिष्टकुसुमद्रुमे शिलाविवरनिर्गच्छन्निर्झरानिलशीतले गायद्गांगगनासंघैर्दत्यहृद्दिक
देवकैः कूजत्कोकिलसंघातैर्मुखरीकृतदिङ्मुखे परस्परविनिर्मुक्तमात्सर्यमृगसेविते श्राघैः शुकाद्यैर्मु
निभिर्यत्नसंसमुपस्थिते श्रीरंतरमोविदेवैः सेव्यमानैर्निषेविते वटवृक्षतमहोत्कृष्टपद्मरागफलोज्ज्वले गारु
त्मतमयैः पत्रैर्निविडैरुपशोभिते नवरत्नमयैः कल्पैः लंबमानैरलंकृते जलजैः स्थलजैः पुष्पैरामोदि
भिरलंकृते गणाधिवैदशास्त्राणि शुकहंसैर्निषेविते संसारतापविच्छेदकुशलछायमद्भुतं विविस्मतस्य
मूलस्थरत्नसिंहासने शुभे आसीनममिताकल्पशारदेंदुनिभाननं स्तूयमानं मुनिगणैर्दिव्यज्ञानाभिलाषिभिः
संसारेण्नगतामाधदिणामूर्तिमव्ययं रजताद्रिप्रतीकाशं शङ्खधफणामलकृतिं वृंदं वृंदलसद्व्याघ्रजटामु
कुटमंडितं वीरासने समासीनं नासालोकननत्परं सुप्रसन्नमुखांभोजं नयनत्रयशोभितं दक्षिणोर्द्धक
रेटंकं व्याख्यामुद्रामधः करे वामजानुनिविन्यस्त निविष्टमुक्तापंकजे कतावंधविशेषोद्यत्फणिनाथैरलंकृ

वामोर्द्धहस्ते हरिणं दधानं तदधः करे = १

तां ध्यात्वैवं दक्षिणामूर्त्तिमनिशं हृदि समाहितं इति ध्यात्वा यथाशक्ति जपं विधाय जपांते ऋष्यादिकं विन्यस्य ज
पं देवाय समर्प्य प्रणमेत् इति दक्षिणामूर्त्तिमंत्रः अथ द्वाविंशाक्षरो दक्षिणामूर्त्तिमंत्रः ॐ नमो भगवते दक्षि
णामूर्त्तये मह्यं मेधां प्रयच्छ स्वाहा इति मंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गाय
त्र्यै छंदसे नमः हृदये श्रीदक्षिणामूर्त्तये देवतायै नमः गुह्ये ॐ बीजाय नमः पादयोः स्वाहा शक्तये नमः
नाभौ मेधा कीलकाय नमः इति विन्यस्य विनियोगमुच्चार्य ॐ ह्रां ॐ हृदयाय नमः ॐ ह्रीं ॐ शिरसे स्वाहा
ॐ ह्रूं ॐ शिखायै वषट् ॐ ह्रैं ॐ कवचाय हुं ॐ ह्रौं ॐ नेत्राय वौषट् ॐ ह्रः ॐ अस्त्राय फट् इति षडंगमंत्रान् अंगुष्ठादि
तलांत करयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य ध्यायेत् यथा शुक्लैकशरच्चंद्रनिभं भभोगमध्यगं
गंगाधरं ललसच्चंद्रकलोलासितशेखरं प्रसन्नवदनांभोजं त्रिनेत्रं सुस्मितानने दिव्यांबरधरं दिव्यगंधमाल्यै
रलंकृतं नानारत्नमयाकल्पमरिकताविभूषितं मुक्तामालां दक्षोर्ध्वे तां मुद्रामधःकरे वामोर्ध्वे च सुधाकुं
भकलशं तदधःकरे दधानं चिंतयेन्नादिकं निह्नदं निषेवितं अथ स्फाटिकशिरःपीठलसद्धामांघ्रिपंकजं इ
ति ध्यात्वा जपांते ऋष्यादिकं विन्यस्य जपं समर्प्य प्रणमेत् इति द्वाविंशदक्षरो दक्षिणामूर्त्तिमंत्रः अथ नवा

धि

मं· चं· ७·

70

तरोदक्षिणामूर्त्तिमंत्रः ॐ ग्लौं नमः शिवाय ग्लौं ॐ इति मंत्रेण प्राणायामत्रयं कृत्वा शिरसि शुकाय ऋषये नमः
मुखे अनुष्टुप्छंदसे नमः हृदये श्रीदक्षिणामूर्त्तये देवतायै इति विन्यस्य विनियोगमुक्त्वा ॐ हृत् ग्लौं शिरः
नमः शिवायै वषट् शिवाय कवचं ग्लौं नेत्रं ॐ ग्लौं अस्त्रमिति करषडंगन्यासं विधाय गोक्षीरफेनधवलमित्यादि
पूर्ववद्ध्यात्वा जपं विधाय ऋष्यादिकं विन्यस्य जपं समर्पयेत् प्रणमेत् इति नवाक्षरदक्षिणामूर्त्तिमंत्रः अथा
त्या नवाक्षरो दक्षिणामूर्त्तिमंत्रः ॐ ऐं नमः क्लीं शिवाय सौः इति मंत्रेण प्राणायामत्रयं कृत्वा प्रथमनवा
क्षरवदृष्यादिकं विन्यस्य ॐ हृत् ऐं शिरः नमः शिखा क्लीं कवचं शिवाय नेत्रं सौः अस्त्रमिति षडंगं विधा
यान्यत् सर्वं प्रथमनवाक्षरवत् कुर्यात् इति द्वितीयो नवाक्षरः अथ मन्वक्षरजपो मंत्रः ॐ ॐ नमः इति त्र्यक्षरमंत्रे
ण प्राणायामत्रयं कृत्वा शिरसि कहोलाय ऋषये नमः मुखे देवीगायत्रीछंदसे नमः हृदये श्रीमत्सु
याय देवतायै नमः गुह्ये ॐ बीजाय नमः पादयोः नमः शक्तये नमः इति विन्यस्य विनियोगमुक्त्वा सां सीं
सूं सैं सौं सः इति करषडंगन्यासं विधाय ध्यायेत् यथा शुद्धस्फटिकसंकाशं शुभ्रपद्मासने स्थितं कंदर्प
मौलिविलसच्चंद्रखंडस्फुरन्मस्तके अभिषिक्तसमस्तागमदीक्षितनललोचनं दक्षिणोर्द्धकरे मुद्रां ज्ञानाख्यानद

यः करे श्वेतमालां च वामोर्ध्वे पाशं वेदमधः करे इत्थं ध्यानं चिंतयेद्देवं सर्वरोगभयापहं इति ध्यात्वा यथाशक्ति
जपं विधाय रक्षादिकं विन्यस्य जपं समर्पयेत् इति मृत्युंजयमंत्रः अथाघोरास्त्रमंत्रः ह्रीं स्फुर स्फुर प्रस्फु
र प्रस्फुर घोर घोरतर तनुरूप चट चट प्रचट प्रचट कह कह वम वम बंध बंध घातय घातय हुं फट् इमेकपंचाशद
तरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि अघोराय ऋषये नमः मुखे त्रिष्टुप्छंदसे नमः हृदये अघोरा
यरुद्राय देवतायै नमः गुह्ये हूं बीजाय नमः पादयोः ह्रीं शक्तये नमः इति विन्यस्य विनियोगमुच्चार्य ह्रीं
स्फुर स्फुर प्रस्फुर प्रस्फुर शिरः घोर घोरतर तनुरूप शिखा चट चट प्रचट प्रचट कवचं कह कह वम
वम नेत्रं बंध बंध घातय घातय हुं फट् अस्त्रमिति षडंगन्यासं विधाय ध्यायेत् यथा कालमेघाभं देवं भी
मदंष्ट्रं त्रिलोचनं भुजंगभूषणं रक्तवस्त्रालेपशोभं परशुं करवालं च बाणं त्रिशिखमेव च इत्थं नरति
णैरस्त्रैर्दक्षादिकमतः परैः डमरुं खेटकं चापं नृकपालं च पार्वती काम्यकर्मसु रक्तांगमसितं वा त्रिवा भिचा
रके नित्ये कृष्टरूष्टभूतादिमुक्तौ मुक्तानिभं स्मरेत् इति ध्यात्वा यथाशक्ति जपं विधाय जपांते रक्षादिकं वि
न्यस्य जपं समर्पयेत् इत्यघोरास्त्रमंत्रः अथ पाशुपतास्त्रमंत्रः ॐ श्लीं पशु हुं फट् इति षडक्षरमंत्रेण प्राणाया

मं॰
चं॰
७८

मत्रयंस्कृत्वा शिरसि वामदेवाय ऋषये नमः मुखे पंक्तिछंदसे नमः हृदये श्रीपशुपतये देवतायै नमः इति
विन्यस्य विनियोगमुक्त्वा ग्रें हूं फट् हृदयाय नमः श्लिं हूं फट् शिरसे स्वाहा यं हूं फट् शिखायै वषट् भुं हूं फट्
कवचाय हूं द्रुं हूं फट् नेत्राय वौषट् फट् हूं फट् अस्त्राय फट् इति करषडंगन्यासं विधाय ध्यायेत् यथा पंच
वक्त्रं दशभुजं प्रतिवक्त्रं त्रिलोचनं अग्निज्वालानिभश्मश्रु मूर्द्धजं भीमदंष्ट्रकं खड्गं बाणानंतसूत्रं शक्तिं पर
शुमेव च दक्षिणैर्हस्तैर्बिभ्रंतादिकमतांगुरु खट्वांगं पाशं कं रिकां च त्रिशूलं च कपालं डमरुकं वामहस्तैश्च बि
भ्राणं महाकार्कसमप्रभं नानाभरणसंदीप्तं पन्नगैरलंकृतं स्फटिकाद्रिनिभं वामं सर्वरत्नाकरं स्मरेत्
इति ध्यात्वा यथाशक्ति जपं विधाय जपांते ऋष्यादिकं विन्यस्य जपं समर्प्य प्रणमेत् इति पाशुपतास्त्रमंत्रः अ
थ नीलकंठमंत्रः ॐ ग्रीं ठः इति अतरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि अरुणाय ऋषये नमः मुखे त्रिष्टु
प्छंदसे नमः हृदये श्रीनीलकंठाय देवतायै इति विन्यस्य विनियोगमुक्त्वा अथ हरहर स्वाहा हृदयाय नमः
कपर्दिने स्वाहा शिरसे स्वाहा नीलकंठाय स्वाहा शिखायै वषट् कालकूटविषभक्षणाय हूं फट् कवचाय
हूं नीलकंठिने स्वाहा अस्त्राय फट् इति षडंगमंत्रान् अंगुष्ठादिकनिष्ठांतं करयोर्विन्यस्य नेत्रवर्जं हृदयादिषं

वृ=२

वांगेष्वपि विन्यस्य ध्यायेत् यथा ध्यायेद्देवं नीलकंठं कलार्काशुतवर्चसं जटाजूटलसच्चंद्रकलं फणिसम्र
मैः कृतालंकरं भोजैर्दधानं जपमालिकां शूलवद्दक्षिणाधोर्द्धे वामोर्द्धे च कपालकं खट्वांगं तदधो हस्ते
पंचवक्त्रविराजितं प्रतिवक्त्रंत्रिनयनं व्याघ्रचर्माम्बरावृतं पद्ममध्ये समासीनं मतिसुंदरविग्रहं इति ध्यात्वाय
थाशक्तिजपं विधाय जपांते ऋष्यादिकं विन्यस्य जपं समर्प्य प्रणमेत् इति नीलकंठमंत्रः अथ सप्ताक्षरो नील
कंठमंत्रः ॐ नमो नीलकंठाय इति मंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्रीछंद
से नमः हृदये नीलकंठाय देवतायै नमः इति विन्यस्यान्यत सर्वेष्वंगेष्वतर नीलकंठमंत्रवत् कृत्वा समाप
येत् इत्यष्टाक्षरो नीलकंठमंत्रः अथान्याष्टाक्षरो नीलकंठमंत्रः ॐ नीलकंठाय स्वाहा इति मंत्रेण प्राणायामत्र
यं कृत्वा शिरसि अरुणाय ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीनीलकंठाय देवतायै नमः इति वि
न्यस्य विनियोगमुच्चार्य नीलकंठाय नमः हृदयाय नमः स्वाहा नमः शिरसे स्वाहा ॐ नमः शिखायै वषट् नी
लकंठाय नमः कवचाय हुं स्वाहा नमः अस्त्राय फट् इति पंचांगमंत्रानेत्यहादिकनिष्ठांतकेष्वा विन्यस्य ने
त्रवर्जं हृदयादिष्वपि विन्यस्य ध्यायेत् यथा सर्वांगैरानने श्वेतैः श्वेतपीतारुणासितैः अभयंपरशुंचापंवाय

मं:
चं:
१२

72

कीवटयज्ञुजैः येयोदेवस्तनार्थस्य गौरीकस्यातिसंदरः संहारनिर्विषत्वंभावेशानकुर्वन्नक्रमान्मोक्षेः इति
णायःकरमारभ्यः वामायःकरपर्यंतमाष्टपध्याने इतिध्यात्वाजपांतेऋष्यादिकंविन्यस्यजपंसमर्पयणमेत्
इमस्येयाक्षातरोनीलकंठमंत्रः अथचिंतामणिमंत्रः तस्य इमेकाक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिकश्यप
पायऋषयेनमः मुखेअनुष्टुपछंदसेनमः हृदयेश्रीअर्द्धनारीश्वरायदेवतायैनमः गुह्येतंबीजायनमःपाद
योरंशक्तयेनमः नाभौमंकीलकायनमः इतिविन्यस्यममसर्वाभीष्टसिद्धयेविनियोगइतिकृतांजलिःकृत्वा रंह
त् कंशिरःसंशिखा मंकवचं रंनेत्रं यंअस्त्र इतिकरषडंगन्यासंविधायध्यायेत् यथा विद्रुमारक्तवामार्द्धदे
हंनीलापरांगकं अहिगंगाशशांकाढ्यविलसत्तुंगमौलिकंहावभावविलासाढ्यंनारीरूपमहेश्वरं भीषणापर
देहार्द्धवामार्द्धपाशमद्भुतं पद्मंवरदयोर्हस्तेदधानंदक्षिणार्द्धके करेत्रिशूलंनृमाथोन्दकपालं वरमथ प्र
विभक्ताश्चकाकल्पमालालेपविराजितं इतिध्यात्वापृथाशक्तिजपंविधायजपांतेऋष्यादिकंविन्यस्यजपंसम
र्पयेत् इतिचिंतामणिमंत्रः अथतुंबुरुरुद्रमंत्रः तस्य इमेकाक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिब्र
ह्मणेऋषयेनमः मुखेगायत्र्यायछंदसेनमः हृदयेश्रीतुंबुरुरुद्रायदेवतायैनमः इतिविन्यस्यममसर्वाभी

ष्टसिद्ध्यर्थे विनियोगः इति कृतांजलिः कृत्वा क्ष्म्यां हृदयाय नमः क्ष्म्यीं शिरसे स्वाहा क्ष्म्यूं शिखायै वषट् क्ष्म्यैं क
वचाय हूं क्ष्म्यौं नेत्राय वौषट् क्ष्म्यः अस्त्राय फट् इति मंत्रैः करषडंगन्यासं विधाय ध्यानं कुर्यात् यथा उद्यदादि
त्यरुचिरं वर्तुलं वक्त्रं त्रिलोचनं चंद्रार्द्धशेखरं रक्तनेत्रं स्तनाभिरं स्थितं क्रमात् दक्षिणे हस्तके देवि खड्गं खट्वांगमध्य
यः पाशं वामे हस्ते च कपालं नरस्योज्वलं रक्तांगरागाभरणं शुक्लं विपिटनासिकं श्वनर्खरत्नाकल्पाकं ध्या
येद्देवं शिवं शिवे इति ध्यात्वा यथाशक्ति जपं विधाय जपांते अर्घ्यादिकं विन्यस्य जपं समर्पयेत् इति वं रुरु
द्रमंत्रः अथ क्षेत्रपालमंत्रः ॐ क्षौं क्षेत्रपालाय नमः इति नवाक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्म
णे ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीक्षेत्रपालाय देवतायै नमः गुह्ये क्षं बीजाय नमः पादयोः
नमः शक्तये नमः इति विन्यस्य विनियोगमुच्चार्य क्षां क्षीं क्षूमित्यादिना करषडंगन्यासं विधाय ध्यायेत् यथा
अंजनाद्रिप्रतीकाशमूर्द्ध्वपिंगजटाधरं वर्तुलोग्रत्रिनयनं भीमसर्पविभूषणं दंष्ट्राकरालवदनं भीममुग्ररूपं
दिगंबरं द्विभुजं दक्षिणे हस्ते गदां वामे कपालकं इत्थं विचिंतयेद्देवि इति ध्यात्वा यथाशक्ति जपं विधाय
जपांते अर्घ्यादिकं विन्यस्य जपं समर्पयेत् क्षेत्रपालमंत्रः समाप्तः अथ वटुकभैरवमंत्रः ह्रीं वटुकाय आप

मे·
वे·
७३
73

ङ्ग्यावरणाय कुरु कुरु वटुकाय ह्रीं इत्येकविंशाक्षरं मंत्रेण प्राणायामत्रयं कृत्वा शिरसि बृहदारण्यकाय
ऋषये नमः मुखे विराट्छन्दसे नमः हृदये श्रीवटुकभैरवाय देवतायै नमः गुह्ये ह्रीं बीजाय नमः पादयोः
ह्रीं शक्तये नमः नाभौ ह्रां कीलकाय नमः इति विन्यस्य चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोग इति कृतांजलिरु
च्चार्य· ह्रां वां हृदयाय नमः ह्रीं वीं शिरसे स्वाहा ह्रूं वूं शिखायै वषट् ह्रैं वैं कवचाय हुं ह्रौं वौं नेत्राय वौषट् ह्रः वः
अस्त्राय फट् इति मंत्रानंगुष्ठादिकरतलांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य ध्यानं कुर्यात् यथा
शुद्धस्फटिकसंकाशं त्रिनेत्रोज्ज्वलशोभितं कुटिलालकसंवीतं चारुस्मेरमुखांबुजं नानारत्नमयाकल्पैः किं
किणीजालनूपुरैः दीप्तमभ्रं वरावीतं द्विभुजं दक्षिणे करे त्रिशिखं सव्ये खेटं तु वरदं यानंदं तमद्भुतं वटुवेषधरं व्य
शंभुं सात्त्विकं साधकः स्मरेत् इति ध्यात्वा यथाशक्ति जपं विधाय जपांते अर्घ्यादिकं विन्यस्य जपं समर्प्य प्रणमे
त् इति वटुकभैरवमंत्रः अथ त्र्यंबकमंत्रः त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय बं
मामृतात् इति द्वात्रिंशदक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि वसिष्ठाय ऋषये नमः मुखे अनुष्टुप्छंदसे
नमः हृदये श्रीमृत्युंजयाय रुद्राय देवतायै नमः इति विन्यस्य विनियोगमुच्चार्य ओं त्र्यंबकं हृदयाय नमः ओं

य

त्र्यंबकाय शिरसे स्वाहा ॐ त्रिनेत्राय शिखायै वषट् ॐ वशिष्ठाय कवचाय हुं ॐ अग्निवीर्याय नेत्राय वौषट् ॐ रुद्र
दैवताय अस्त्राय फट् इति मंत्रैः करषडंगन्यासं विधाय अथवा त्र्यंबकं यजामहे शिरः सुगंधिं पुष्टिवर्द्ध
नं शिखा ॐ उर्वारुकमिव बंधनात् कवचं मृत्योर्मुक्षीय नेत्रं मामृतात् अस्त्रमिति मंत्रैर्वा करषडंगन्यासं विधाय ध्या
येत् यथा हस्ताभ्यां कलशद्वयामृतरसैराप्लावयंतं शिरो द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहंतं परं
अंकन्यस्तकरद्वयामृतघटं कैलासकांतं शिवं स्वच्छांभोजगतं नवेंदुमुकुटं देवं त्रिनेत्रं भजे इति ध्यात्वा यथा
शक्ति जपं विधाय जपांते ऋष्यादिकं विन्यस्य जपं समर्पयेत् इति त्र्यंबकमंत्रः अथ गायत्रीप्रयोगो व्याख्या
ते पः सप्तव्याहृत्यादिका चतुर्विंशाक्षरात्मा गायत्री शिरसान्विता शिरसा स्वाहाकारेण सर्ववेदाश्रितः
सारो मंत्रोयं सप्तव्याहृत्यनः ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि धियो यो नः प्रचोदयात् स्वाहा इति मंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे दे
वीगायत्रीछंदसे नमः हृदये श्रीपरमात्मने देवतायै नमः इति विन्यस्य विस्तु प्रकरणोक्तप्रणवप्रकारेण
करषडंगन्यासान् कृत्वा निर्मलागस्त्रियं विस्तुमित्यादि तथैव ध्यात्वा ततः शिरसि जमदग्निभरद्वाजभृगुगोत

पत्र ६२

गं॰
वं॰
७४
74

सकाश्यपविश्वामित्रवशिष्ठेभ्यो ऋषिभ्यो नमः मुखे गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीभ्यः छन्दोभ्यो
नमः हृदये अग्निवायुसूर्यगुरुवरुणेन्द्रविश्वेदेवेभ्यो देवताभ्यो नमः इति विन्यस्य ॐ भूः हृदयं ॐ भुवः शिरः ॐ
स्वः शिखा ॐ महः कवचं ॐ जनः नेत्रं ॐ तपः अस्त्रमिति मंत्रैः करषडंगन्यासं कृत्वा ततः हृदि ॐ भूः नमः मुखे
ॐ भुवः नमः दक्षिणांसे ॐ स्वः नमः वामांसे ॐ महः नमः दक्षोरौ ॐ जनः नमः वामोरौ ॐ तपः नमः जठरे ॐ सत्यं
नमः इति व्याहृतीर्विन्यस्य ध्यायेत् यथा क्षौमवस्त्रपरीधानाः सर्वाभरणभूषिताः उन्निद्राम्भोजवदनाः प्रभा
मंडलमंडिताः सितोपवीतहृदयाः पवित्रवत्कराः अभयात्मवागग्र्यवरदकमलसरोरुहाः एवं व्याहृती
र्ध्यात्वा ततो गायत्र्या ऋष्यादीन् विन्यसेत् यथा शिरसि विश्वामित्राय ऋषये नमः मुखे देवीगायत्र्यै छन्द
से नमः हृदये श्रीसवितृदेवतायै नमः इति विन्यस्य ॐ ब्रह्मणे हृदयं ॐ विष्णवे शिरः ॐ रुद्राय शिखा ॐ
ईश्वराय कवचं ॐ सदाशिवाय नेत्रं ॐ सर्वात्मने अस्त्रमिति मंत्रैः करषडंगन्यासं कृत्वा ध्यायेत् यथा मुक्ता
विद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकां गायत्रीं वरदाभ
यांकुशकशान् शुभ्रं कपालं गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे कशः पाशः गुणं त्रिसूत्रं

दलयः करमारभ्य दलवामक्रमेणोपर्युपरि हृत्क्रमेणाङ्गुल्यानि धेयानि इति ध्यात्वा जपं विधाय जपान्ते।
ऋष्यादिकं गायत्र्या विन्यस्य समापयेत् इति गायत्रीमन्त्रः अस्य न्यासविशेषस्तु श्रीशिवार्चनचन्द्रिकायां द्र
ष्टव्यः अथाग्नेय्याख्यो मन्त्रः जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः स नः पर्षदति दुर्गाणि वि
श्वा नावेव सिन्धुं दुरितात्यग्निः इति त्र्यस्त्वारिंशदक्षरमन्त्रेण प्राणायामत्रयं कृत्वा शिरसि काश्यपाय ऋषये
नमः मुखे त्रिष्टुप्छन्दसे नमः हृदये जातवेदसेऽग्नये देवतायै नमः इति विन्यस्य विनियोगमुच्चार्य जातवेद
से सुनवाम हृदयाय नमः सोममरातीयतः शिरसे स्वाहा निदहाति वेदः शिखायै वषट् स नः पर्षदति कव
चाय हुं दुर्गाणि विश्वा नावेव नेत्राय वौषट् सिन्धुं दुरितात्यग्निः अस्त्राय फट् इति करषडङ्गन्यासं विधाय।
ध्यायेत् यथा विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरा
सेवितां हस्तैश्चक्रदरासिखेटविशिखांश्चापं गुणं तर्जनीं विभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां
स्मरेत् दत्ताग्रहुयोरायेतदायधः स्थयोरन्येतदायस्थयोरपरेतरेयघस्थयोरितरे इत्यायुधध्यानं इति ध्या
त्वा यथाशक्ति जपं विधाय जपान्ते ऋष्यादिकं विन्यस्य जपं समर्पयेत् इत्याग्नेयाख्यो मन्त्रः इति श्रीगोस्वामिजग

त्रिवासात्मजश्रीगोस्वामिजनार्दनभट्टविरचितायां मंत्रचंद्रिकायामेकादशः प्रकाशः इति शिवप्रकरणं
समाप्तं अथैवं लिखितमंत्राणां सिद्धसाध्यसुसिद्धारीन् विचारयेत् मकथहचक्रे लिखेत् लक्ष्मीकुलार्णवे
एक त्रि रुद्र नव नेत्र युगार्क पंक्ति षस्नाग षोडश चतुर्दश पंच केषु कोष्ठे लिखेन्मुनितिथी च तथावशिष्टवर्णा
न् हुताशनमितान् क्रमशो विकायाः एक १ त्रि ३ रुद्र ११ नव ९ नेत्र २ युग ४ अर्के १२ पंक्ति १० षट् ६ नाग ८
षोडश १६ चतुर्दश १४ पंच ५ मुनि ७ तिथी १५ अवशिष्टे त्रयोयोदशो १३ हुताशनमितान् त्रिषिनवर्णान्
अविकायाः मातृकायाः अथैतच्चक्रस्वल्पप्रकारः नवप्राक्प्रत्यगायतान् दक्षिणोत्तरायतान्मूपंचपंचरेखा
विलिख्य षोडशकोष्ठानि कृत्वा तानि कोष्ठानि वृत्तस्थ ततः कोष्ठे एकैक चतुष्कमिति चतुष्क चतुष्टयं एकरूपेण चतु
ष्ठोभिभक्तं तत्रेशानगतचतुष्कस्य कोष्ठचतुष्टये ईशानकोष्ठादिदक्षिणेन अकथह उड प त्व म
श्राद्य आग्नेयचतुष्के ईशानादिपादक्षिणेन आखदल ऊचफजष औठशः नैर्ऋतिचतुष्के ईशानादिपा
दक्षिणेन इगपत ऋछबट एटसः अंणष चतुर्थचतुष्के ईशानादिपादक्षिणेन ईघन ऋजभ एठलः अः त
म इति समस्तमातृकावर्णान् विलिखेत् शिष्यनामाद्यक्षरं यत्र कोष्ठे तिष्ठति तत्कोष्ठमारभ्य मंत्राद्यक्षरको

ष्टावधिगणनस्त्वा सिद्धसाध्यसुसिद्धारीन् विचारयेत् तत्रसाधकनाममंत्रायत्तयोरेककोष्ठावस्थितिश्चे
न्मंत्रः सिद्धः सिद्धइतिज्ञेयः तत्रतत्रैवद्वितीयकोष्ठेचेन्मंत्रायत्तंतदामंत्रः सिद्धसाध्यः तृतीयेचेत् सिद्धः
सुसिद्धः चतुर्थेचेत् सिद्धारिः द्वितीयचतुष्केपिसमानकोष्ठंप्रथमकोष्ठंपरिकल्प्यतदारभ्यप्रादक्षिण्येनग
णयेत् तत्रप्रथमकोष्ठेचेन्मंत्रायत्तंतिष्ठतितदासमंत्रः साध्यसिद्धः द्वितीयेसाध्यसाध्यः तृतीयेसाध्यसु
सिद्धः चतुर्थेसाध्यारिः एवंतृतीयचतुष्केपिप्रथमकोष्ठेसुसिद्धः द्वितीयेसुसिद्धसाध्यः तृतीयेसुसिद्धसु
सिद्धः चतुर्थेसुसिद्धारिः एवंचतुर्थचतुष्केपिप्रथमकोष्ठेचेन्मंत्रायत्तंतदारिसिद्धः द्वितीयेचेदरिसाध्यः
तृतीयेऽरिसुसिद्धः चतुर्थेऽर्यरिः इतिसम्यक् विचार्यविज्ञायमंत्रमेलनंकुर्यात् अन्यथामंत्रस्त्वनर्थकारी
भवेत् नास्तिमंत्रसमंमित्रंनास्तिमंत्रसमोरिपुः इतियामलवचनात् अथैतेषांफलानिकुलमूलावतारे
सिद्धसिध्यतिकालेनसाध्यः सिध्यतिवानवा सुसिद्धस्तत्क्षणादेवअरिर्मूलंनिकृन्तति तंत्रराजे सिद्धसिद्धोय
थोक्तात् सिद्धेत् द्विगुणात्सिद्धसाध्यकः सिद्धेसुसिद्धः संप्राप्तेसिद्धारिर्हन्तिगोत्रजान् साध्यसिद्धोतिसंक्लेशात्सा
ध्यसाध्योतिदुःखकृत् साध्येसुसिद्धोभजनात् साध्यारिस्त्वखिलंहरेत् सुसिद्धसिद्धोर्द्धजपफलंदद्याद्यथेप्सितं

मं॰
वं॰
७८

76

सुसिद्धसाध्योजापाद्यैः सिद्ध्येत्स्यादतोन्यथा सुसिद्धेतुसुसिद्धस्तुसर्वजन्मकृतश्रमः तस्मात्तंसर्वसिद्धीनांसाध
नेयोजपेन्मंत्रं सुसिद्धारिविशेषेणास्वकुलंमारयेध्रुवं अरिसिद्धः सुतंहन्यादरिसाध्यस्तुकन्यकां तत्सिद्धस्तु
पत्नीञ्चअर्यरिःसाधकापहः अत्रमंत्रमेलनेप्रसिद्धमेवनामग्रहं सिद्धसाध्यादियोगेषुमंत्रदानेविशेषतः अ
सिद्धंनामगृह्णीयात्सुसोयेनजागरयादितिशान्तोभयनवचनात् अत्यदोषावहंशणमंत्रादेयाविवर्तणंसिद्धा
दिकोष्टकंशान्वानतःसिद्धिप्रजायते अथकेषांचिन्मंत्राणांसिद्धसाध्यादिशोधनंनालिङ्गकुलाणवोपका
र्यैस्तथाकूटेत्रैपुरेमंत्रनायके सिद्धेसुप्रलब्धेचसिद्धादीन्नैवशोधयेत् नृसिंहार्कवराहाणांप्रासादप्रणव
स्यचसपिंडाक्षरमंत्राणांसिद्धादीन्नैवशोधयेत् तथाचसोमसिद्धांते पाशार्थ्यमतरंमंत्रैत्रैपुरंचदृनायकं सौ
रंमंत्रंजयेशाक्षंशांभवंविनतासुतं सौरमंत्रान्स्वयंविद्यैर्वैस्नवानारसिंहकाः सिद्धसाध्यसुसिद्धारिविवा
रपरिवर्जिताः प्रणवंप्रतरंमायांव्योमव्याप्यक्षरत्रयं मालामंत्रेषुसर्वेषुसिद्धादीन्नैवशोधयेत् तथारत्नसाग
रे हंसस्याष्टाक्षरस्यापितथापंचाक्षरस्यच एकद्वित्र्यादिबीजस्यसिद्धादीन्नैवशोधयेत् नृसिंहार्कवराहा
णांकालिकासिद्धकालिको प्रणमलाचतथाचंडीसिद्धादीन्नैवशोधयेत् रुद्रयामले अघोरमंत्रेदेवेशिमा।

७१

लामंत्रस्य पार्वति नक्षत्रकस्य मंत्रस्य सिद्धादीन् विशोधयेत् कुलमूलावतारे स्वमोपदिष्टमंत्रस्य न विधिनैव
चाक्रिया इति इष्टदेवतां ध्यात्वा जपेत्पुष्पकं भवेत् शुभगानसंहितायां राममंत्रेषु सर्वेषु शृणुष्व मुनिपुंगवः ता
रकत्वान्मंत्रराजे सिद्धादीन् विशोधयेत् ये चैवौढाय्यैर्जेनाब्रगोपालावैस्तवाद्ये सिद्धसाध्यसुसिद्धिविवा
रपरिवर्जिताः ओं अथापि षड्णं च मातृकाक्षरवल्लभा बहुरूपास्त्रीमंत्रः पंचमाधारणामताः अथदी
ताकालः नक्षत्रादौ मासाः मंथानभैरवतंत्रे चैत्रे दुःखाय दीक्षा स्याद्वैशाखे सर्वसिद्धिदा ज्येष्ठे मृत्युप्रदा सा
स्यादाषाढे बंधुनाशिनी श्रावणे वृद्धिदा नूनं नभस्ये दुःखदा मता आश्विने सर्वसिद्धिः स्यात्कार्तिके ज्ञानवृ
द्धिदा शुभदा मार्गशीर्षे च पौषे मेधाविनाशिनी माघे स्वर्णलाभः स्यात्फाल्गुने सर्वसिद्धिदा तथा सागा
रसंहितायां चैत्रे मधुमासे न वेदुःखं माधवे रत्नसंचयं मरणं भवति ज्येष्ठे आषाढे बंधुनाशनं समृद्धिः श्रावणे नूनं भ
वेद्भाद्रपदे क्षयः प्रजानामाश्विने मासि सर्वतः शुभमेव हि ज्ञानं स्यात्कार्तिके सौख्यं मार्गशीर्षे भवत्यपि पौ
षे ज्ञानक्षयो माघे भवेन्मेधाविवर्द्धनं फाल्गुनेपि समृद्धिः स्यान्मलमासं परित्यजेत् अथ पक्षाः आश्विनमा
सो दीक्षायां विहितस्तथापि महाभववचनं दर्शपारमुपारगेषु चाश्विने दद कंबं भवेन्मंत्री दीक्षाः समस्तजन्मसिद्धिति

मं॰
चं॰
१०
77

शिवयामलवचनादाश्विनमासो दीक्षायांविहितोपिनिसिद्धं महाभवचतुर्दशीशिवरात्रिः तथाज्ञानार्णवे
शुक्लपक्षेशुभदिनेशुभवारेचवानने मंत्रयागारंभणंकुर्यादिति तथाकालोत्तरे मुक्तिकामैः कृष्णपक्षेभुक्तिका
मैः सितेमहा दीक्षाकार्यामहादेवीति तथाशैवागमे शुक्लपक्षेप्रकुर्वीतकृष्णेवादेशिकोत्तमः शुक्लेसर्व
समृद्धिस्यात्कृष्णेसमध्यमतोभवेत् अथनक्षत्राणि चिन्तामणौ अश्विनीरोहिणीचार्द्रातथापुष्योत्तरात्रयं ह
स्तचित्रास्वातिमैत्रविशाखाचाश्वयनिष्ठया पुनर्वसूरेवतीचदीक्षायामुत्तमामताः मैत्रमनुराधा तथाकर्मधे
नौ रोहिणीमृगशीर्षंचतथापुष्यश्चहस्तकः स्वातमुत्तराथेरेवतीचयाचाप्युत्तरात्रयं शुभान्येतानिदीक्षा
यानक्षत्राणीति अथतिथयःसारसंग्रहे पूर्णिमापंचमीचैवद्वितीयासप्तमीतथा त्रयोदशीचदशमीप्रश
स्ताःसर्वकामदाः श्रीकंठसंहितायां द्वितीयासप्तमीश्रेष्ठाषष्ठीसर्वत्रनिंदिता द्वादश्यामपिकर्तव्यंत्रयो
दश्यामथापिवा विजयमालिनीतंत्रे पंचम्येकादशीशुक्लासप्तमीचत्रयोदशी दशमीशुक्लपक्षस्यद्वादशी
चविशेषतः रत्नसागरे ह्यमीपाविहितानिसंषष्ठीसर्वत्रनिंदिता सप्तम्यांधनलाभःस्याद्दष्टम्यांगुरुनाशनं
नवम्यांरिक्तनाशःस्याद्दशमीसिद्धिदायिनी एकादश्यांभवेल्लाभोधनस्यपूर्णमसव द्वादश्यांधनलाभस्या

त्रयोदश्यांमहोदयः शिवरात्रिश्चतुर्दश्यांपौर्णमासीतुसिद्धिदा अमावास्यापुत्रनाशस्यात्प्रतिपद्बुद्धिनाशिनी
अथदेवतानिविशेषेतिथिविशेषः कालांतरे ब्राह्मणः पौर्णमास्युक्ताद्वादशीचक्रधारिणः चतुर्दशीशिवस्योक्ता
वाचःप्रोक्तात्रयोदशी द्वितीयातुश्रियःप्रोक्तापार्वत्यास्तृतीयका चतुर्थीगणनाथस्यभानोःप्रोक्तातुसप्तमीति
अथवाराः मंत्रसद्भावे मंत्रारंभोरवौशुक्रेबुधेजीवेविशेषतः शनौमरुत्सदर्थंभौमेसोमेसर्वंचनिष्फलं विजय
मालिनीतंत्रे रवौबुद्धिमवाप्नोतिशुक्रेचैवधनागमः बुधेभियोगरहितोगुरौपुत्रान्वितोभवेत् शन्यंगारकयो
र्मृत्युरविद्यासोमकेभवेत् अथयोगाः तत्रशास्त्रावस्था योगाश्चप्रीतिरायुष्मान्सौभाग्यःशोभनःशुभः सुकर्मा
वृद्धिर्ध्रुवःसिद्धिश्चहर्षणः वरीयांश्चशिवःसिद्धोब्रह्मारैंद्रश्चषोडशः अथलग्नानिसारसंग्रहे मे
षाद्यारंभणांमेषेधनधान्यप्रदंभवेत् वृषेमरणमाप्नोतिमिथुनेपत्यनाशनंकर्कटेसर्वसिद्धिस्यात्सिंहेमेधा
विनाशनं कन्यालक्ष्मीप्रदानित्यंतुलायांसर्वसिद्धयः वृश्चिकेसर्वसिद्धिःस्याद्धनुर्ज्ञानविनाशनंमकरःपु
त्रदःप्रोक्तः कुंभोधनसमृद्धिदः मीनोऽशुभप्रदोनित्यमेवंराशिफलंभवेत् अथदीतालग्नतस्थानविशे
षेषुस्थितानांग्रहाणांशुभाशुभफलान्निसारसंग्रहे त्रिषडायगताःपापाशुभाःकेंद्रत्रिकोणगाः हीतायां

मं॰ वं॰ ७८ 78

तच्छुभाः सर्वेरंध्रस्थाः सर्वनाशकाः आयषेकादशस्थाने लग्नचतुर्थसप्तमदशमस्थानानां केंद्रसंज्ञाः पंचमन
वमस्थानयोस्त्रिकोणसंज्ञा सूर्यकुजशनिराहुकेतवःपापाःपुनस्तु थाः क्षीणः शशीचपापाः गुरुभृगुसुतौ पाप
रहितबुधाः शशांकश्चैदस्सुशुभाः रंध्रमष्टमस्थाने सर्वे नवग्रहाः समर्थः अथदीक्षाकालः तंत्रेशैवागमे अथोस्ति
विशुभेभेचवेदस्पृष्टोविशेषतः क्रमेणाराववलंकुर्यात्स्वनामादिविर्विनिते धर्मदः प्रातःकालः स्यात्संगवोराम
दः स्मृतः मध्याह्नःसर्वसिद्धिस्यात्सायाह्नोमध्यमोभवेत् रजनीमध्यदानेननिषिद्धादेशिकोत्तमैः दिवासर्व
प्रकुर्वीत सिद्धिदंपरमं स्मृतं अथोसाववनतयाणि तुस्मृलाथे यमध्याह्निदेवभरणीसार्याणिस्त्रवांत्रयं ज्येति
विद्धिरथोत्सवंदिनवकं भानामिदंकीर्त्तितं वापीकूपतडागगर्तपरिखाखातौ नियेसप्रदिताः तेपोद्धतविल
प्रवेशगणितारंभाः प्रसिद्धांतव हिर्देवविशाकारवाद्याग्नेयंक्रुनिका सार्पंयाश्लेषा अथदीक्षाकालविशेषः
स्नानारणेचे मन्त्राद्यारंभणेकुर्यात्प्रहणेचेंदुसूर्ययोः ग्रहणादेवदेवेशिकालःसमदिनावपि तथाकुलमूला
वतारे पवित्रपर्वदेवेशिदामनेचाशुभेदिनेकालवचनिकतथाग्रहणेचेंदुसूर्ययोः प्रणपतीर्थकुरुक्षेत्रदे
वीपीठचतुष्टये तथारत्नसागरे सत्तीर्थेकेविभुयामेतेनतदामनपर्वणोः मंत्ररीतांप्रकुर्वाणोमामसंतारीत्र।

। दमनारोपणे

शोधयेत् अथ चन्द्रसूर्यग्रहणयोर्दीक्षायां समानकालत्वेनोक्तत्वादपि ग्रहणं प्रशंसकानि वचनानि
सूर्यग्रहणपराण्येव ज्ञेयानि सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेत् सूर्यग्रहणकाले तु समो नान्यः क
दाचन अत्र यत्किंचित्सर्वमनन्तफलदं भवेत् न मासतिथिवारादिशोधनं सूर्यपर्वणि ददातीष्टं च ग्रहणे यत्त
स्मिन्काले गुरोर्नरः सिद्धिर्भवति मंत्रस्य विनायासेन वेगतः इति चिन्तामणिकालिकोड्डवचयोः सूर्यग्रहणस्य
वविधायकवचनदर्शनात् चंद्रग्रहे च यादीक्षा यादीक्षा वनवारिणं जनकस्य तु यादीक्षा दारिद्र्यं सप्तजन्म
स्विनियोगिनी तत्र चंद्रग्रहणे दीक्षानिषेधवचनदर्शनान्नाशकरजनीमंचसान निषेधवचनाच्चेति सूर्योपरा
गकालोऽप्युपरागसाधारणत्वात्मान्तं प्रशस्त इति निर्णयः किंतु चंद्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये मंत्र
मात्रस्य कथनमुपदेशः स उच्यते इति कालिकोड्डवचनात् मंत्रान्तरेऽपि विधिवद्दीक्षितानां कौलेनु कार्यमथ
मंत्रग्रहणेच्छा चेद्भवति तदा निजगुरोरेव सकाशाच्चंद्रसूर्यग्रहणकालेऽप्युपदेशतो मंत्रग्रहणे न दोषावह
इति दीक्षाकालः अथ जपमालासंभागपरमाकरे मातृका जीवशांखप्रवालरुद्रस्फाटिकमुक्ताफलपद्मबीज
रजतसुवर्णकुशग्रन्थिरुद्राक्षामतमनिर्मिता ह्येतरशानवतः पंचाशत्सप्तविंशतिसंख्यानैर्बीजैर्ग्रंथितास्समेरु

मं॰ चं॰ ७५

79

कार्काया ग्रथमालासंस्कारकालस्तेनैव विसोद्धेर्दपूर्वः सर्वोह्लाः शाके रष्टमीनवमीचतुर्दशीरविः शिवसत्र
योदशीस्त्विा गणेशस्य चतुर्थीदिवा सूर्यस्य सप्तमीदिवा ग्रन्थमालायाः सूत्राणि तेनैव विसोः पञ्चसूत्रं कार्या
सप्तसूत्रं वा देव्याः पट्टसूत्रं शिवस्योर्णाभवं वाल्कलं वा सूर्यगणेशयोः कार्पाससूत्रं पट्टसूत्रं वा कार्या सूत्रे
वेन ब्राह्मणीकृतं स्वसमानवर्णयोषित्कृतं वा त्रिगुणीकृतं कर्षीत ग्रन्थेषु सूत्रेषु पञ्चपञ्चमेवस्योत्समानं ग्र
थमालासंस्कारः तत्र गोमूत्रगोमयदुग्धदधिघृतेन कुशाजलात्मकं पञ्चगव्यं होमार्थे तं तिलान् संपाद्य प्रातः
कृतनित्यकृत्य कृतभोजनः साधकोरात्रौ सूत्रं मणींश्च पृथक् पञ्चगव्येन जलेन च प्रक्षाल्य नवसु पिप्पलदले
षु पद्माकारं रचितेषु सूत्रं मणींश्च संस्थाप्य तेषु प्रणवं क्लिंकारमातृकां च विन्यस्य मणीन् सूत्रे च गंधादिभिः स
म्पूज्य स्थण्डिलादावग्निं संस्थाप्य यथाशक्तिसहस्रैस्तिलैः सद्यादिपञ्चमंत्रैर्हुत्वा होमाशक्तौ जपं विधाय सूत्रेषु
त्विषु मणींश्च संयोज्य पञ्चमणीनारोप्यैकैकमणिमध्ये ब्रह्मग्रन्थिं विधाय गोपुच्छाकारेण ग्रथयित्वा सर्वतःसूत्रेषु स
जातीयमेकं मणिं सूत्रद्वयमेकीकृत्य मेरुं ग्रथयित्वा सद्योजातं प्रपद्यामि सद्योजाताय वै नमः भवे भवे नातिभ
वे भजस्व मां भवोद्भवाय नमः इति मंत्रेण पञ्चगव्येन शीतलजलेन च प्रक्षाल्य ॐ वामदेवाय नमो ज्येष्ठाय नमो

रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय
नमो मनोन्मनाय नमः इति मंत्रेण वंदनागुरुकर्पूरकुंकुमैर्विलिप्य ॐ अघोरेभ्योऽथघोरेभ्यो घोरघोरतरे।
भ्यः सर्वतः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः इत्यगुरुश्रीवेशर्करागुग्गुलमधुचंदनचूर्णैर्धूपयित्वा ॐ त
त्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् इति गंधचंदनकस्तूरीकुंकुमकर्पूरैर्लेपयेत् व
नः ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवों।
इति मंत्रेण प्रतिबीजं शनैः शनैः अभिमंत्रयेत् मेरुवानेनाघोरेभ्य इत्यनेनापि वाऽभिमंत्रयेत् ततः स्थापनादि
नवग्रहाः प्रदक्षिणमागुल्के पंचमंत्रैः प्रतिबीजं पंचोपचारैः पूजयित्वा तया मालया जपं कुर्यादिति ग्रंथप्रतिष्ठा
प्रकारो महात्मानामेव नान्येषां ग्रंथेषां प्रतिष्ठाप्रकारस्तु ग्रथितां मालां कृत्वा विमोच्य संस्थाप्य न स्वांगणेश
सूर्यविष्णुशिवदुर्गाः पृथक्पृथक् आवाह्य पंचोपचारैः संपूज्य इति मंत्रेण पंचगव्ये निक्षिप्य पुनः
स्तस्मादुद्धृत्य शीतलजले निक्षिप्य पश्चात् चंदनकर्पूरकस्तूरीकुंकुमकर्पूरागुरुभिरनुलिप्य ततः ह्रौं मंत्रम
ष्टोत्तरशतं जपित्वा सूर्यादिनवग्रहान् इंद्रादिदिक्पालांश्च संपूज्य सहस्रैर्नैस्तिलैर्यथाशक्ति मूलमंत्रेण हुत्वा

नं: ४८५३

पत्र

मंत्रचंद्रिका सूचिसमेत
पत्रे ८५ श्लोक २७००